# Tattvartha Saravalih

# તત્ત્વાર્થસારાવલિઃ

## Document Information

Text title : Tattvartha Saravalih

File name : tattvArthasArAvaliH.itx

Category : vishhnu, venkateshwara

Location : doc_vishhnu

Author : subrahmaNyayogi

Proofread by : Rajesh Thyagarajan

Description/comments : From Stotrasamuchchaya 2, Edited by Pandit K. Parameshwara Aithal

Latest update : May 10, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 29, 2023

*sanskritdocuments.org*

# તત્ત્વાર્થસારાવલિઃ

## ૧

શ્રીમદ્વેઙ્કટનાયકં શ્રુતિશિરઃસીમન્તિનીવલ્લભં
    લક્ષ્મીપ્રાણધવં ભુવઃપતિમજં સર્વેશ્વરં સદ્ગુણમ્ ।
શઙ્ખં ચક્રમથાભયં વરમથ સ્વૈઃ પાણિભિઃ સન્તતં
    બિભ્રાણં ભગવન્તમાર્તિહરણં વન્દે મદિષ્ટાર્થદમ્ ॥ ૧॥

શ્રીશેષાદ્રિનિવાસિનં સ્મિતમુખં ચન્દ્રાનનં શ્રીપતિં
    વાગીશાદિસુરેન્દ્રવન્દિતપદં વન્દે હરિં સુન્દરમ્ ।
જ્ઞાનાનન્દઘનં શ્રુતિસ્તુતગુણં સર્વજ્ઞમાત્મેશ્વરં
    સર્વાપદ્વિનિવારકં ચ સદયં સત્યં પરં શાશ્વતમ્ ॥ ૨॥

શ્રીમદ્વેઙ્કટનાથ તાવકપદં દીનાર્તિ વિચ્છેદનં
    કામપ્રાપકમર્થિનાં કલિમલપ્રધ્વંસિ સેવ્યં સુરૈઃ ।
કલ્યાણાકરમાશ્રિતોઽહમધુના કિં ચિન્તયાનન્તયા
    ખિદ્યે મામવ માધવાખિલજગત્સંરક્ષણૈકવ્રત ॥ ૩॥

વ્યાધિવ્યાલવિષં નિબર્હય વિહઙ્ગાધીશયાન પ્રભો
    મોહધ્વાન્તહરે હરે વ્રણમહામત્તેભવિદ્રાવણે ।
શ્રીમદ્વેઙ્કટનાથ મામક મહાદારિદ્ર્યદાવાનલં
    કારુણ્યામૃતવર્ષિણા પ્રશમયાપાઙ્ગેન પશ્યન્ મુહુઃ ॥ ૪॥

રુગ્ણાનાં નિજપા દમાશ્રિતવતાં ભીતાત્મનાં યત્કલૌ
    ક્ષિપ્રારોગ્યવિધાયકં જ્વરહરં સૌખ્યાભયેષ્ટપ્રદમ્ ।
લક્ષ્મીશં વરવેઙ્કટાચલપતિં ધન્વન્તરિં ધાર્મિકં
    પક્ષીન્દ્રધ્વજમક્ષયં સકરુણં વૈદ્યેશ્વરં પ્રાર્થયે ॥ ૫॥

બ્રહ્મ બ્રહ્મહરીશરૂપમહિતં માયાગુણૈર્વસ્તુત-
    સ્ત્વામાહુઃ શ્રુતયોઽથ નિર્ગુણમિમાઃ શ્રીવેઙ્કટેશ પ્રભો ।

કાર્યત્વાજ્જગતોઽસ્ય હેતુરખિલૈઃ કર્તેતિ નૈયાયિકૈ-
સ્ત્વં હ્યેવાહ નુતોઽસિ વેદકલિતૈઃ શબ્દૈસ્તથા બોધિતઃ ॥ ૬॥

નાકેન્દ્રાદિનિકેતનાય નલિનદ્વન્દ્વપ્રતિદ્વન્દ્વદૃગ્-
રમ્યાય પ્રતિપન્થિદૈત્યદમનાયાસ્તુ શ્રિયઃ પ્રાપ્તયે ।
નાથાયા સ્મદભીપ્સિતસ્ય નિગમાન્તાલઙ્ક્રિયાશોભિને
નિર્નિદ્રાય સમસ્તજીવજગતીસંરક્ષિણે મઙ્ગલમ્ ॥ ૭॥

ચન્દ્રસ્યેવ હિ ચન્દ્રિકા તવ વિભો સન્તોષિકા યા કૃપા
જીવેષુ સ્વત એવ સિધ્યતિ તતઃ સ્યાદિષ્ટમસ્માદૃશામ્ ।
કિં સમ્પ્રાર્થયતે સ્તનન્ધયશિશુસ્તન્માતરં મે પયો
દેહીતીશ્વર નેચ્છતામપિ શિવં શ્રીવેઙ્કટેશાર્પય ॥ ૮॥

વન્દે વેઙ્કટનાયકાઙ્ઘ્રિયુગલં વન્દાસ્મન્દારકં
વન્દે તત્કરપદ્મયુગ્મમનિશં વૃન્દારકેષ્ટપ્રદમ્ ।
વન્દે તન્નયનારવિન્દયુગલીમિન્દ્રાદિકેન્દિન્દિરા-
નન્દાર્થામપિ ચોર્ધ્વબાહુયુગલં યચ્છઙ્ખચક્રાન્વિતમ્ ॥ ૯॥

ધ્યાયામિ શ્રુતિશાખિપલ્લવપદં દ્રક્ષ્યામિ લક્ષ્મીપતિં
સેવે સર્વ સુખપ્રદં સુરવરં શ્રીવેઙ્કટાદ્રીશ્વરમ્ ।
સચ્ચિત્સૌખ્યમયં સ્મરામિ સતતં સર્વજ્ઞમાત્મેશ્વરં
વિષ્ણું જિષ્ણુમનન્તસદ્ગુણગણં સર્વસ્વતન્ત્રં વિભુમ્ ॥ ૧૦॥

જીવાનામુપભોગસાધનવપુઃ કારુણ્યતઃ કલ્પય-
ન્નિષ્ટપ્રાપ્તિમનિષ્ટવર્જનમપિ પ્રખ્યાપ્ય ચાદૃષ્ટતઃ ।
તત્સમ્પાદકકર્મમાર્ગમખિલં તસ્માન્નિવૃત્તિં વિભો
વેદૈસ્ત્વં વિશદીકરોષિ ભગવન્ શ્રીવેઙ્કટાદ્રીશ્વર ॥ ૧૧॥

શેષાદ્રીશ્વર તાવકાન્ ગુણગણાન્ વક્તું ફણાભૃદ્વરો
નાલં કોઽહમતીવ મન્દધિષણશ્ચેતઃ પરં કાઙ્ક્ષતિ ।
તન્મે સાહસમદ્ય પૂર્ણશશિનં ચાહર્તુમિચ્છાવતો
ડિમ્ભસ્યેવ મુહુર્નિરીક્ષ્ય સદયં માં પાહિ લક્ષ્મીપતે ॥ ૧૨॥

નાથ ત્વં પુરુષોત્તમોઽસિ કમલા પત્ની વરા દેવતા
પુત્રઃ પદ્મભવશ્ચ વાહનમહો તાર્ક્ષ્યસ્ત્રયી વિગ્રહઃ ।
શસ્ત્રં ચાપિ સુદર્શનં નિજવપુઃ સચ્ચિન્મયં સદ્ગુણં
ત્વં ચાનન્દઘનોઽસિ વેઙ્કટપતે માં પાહિ વિશ્વેશ્વર ॥ ૧૩॥

ઉન્મીલત્પુલકાઙ્કુરં સુખજલસ્રાવ્યક્ષિહર્ષોન્મિષ-
દ્વ્યત્યસ્તાક્ષરગદ્ગદસ્વરમુદૂઢપ્રીતિસત્સાત્ત્વિકમ્ ।
લોકવ્યાપૃતિવર્જિતં નિજમુખૈકાવાસલક્ષ્યં કદા
શ્રીમદ્વેઙ્કટનાથ તે પદયુગં દ્રક્ષ્યામ્યહં નિર્ભયઃ ॥ ૧૪॥

શ્રીમદ્વેઙ્કટનાયકાઙ્ઘ્રિકમલં શ્રદ્ધાતટાકોદિતં
ભક્તિધ્યાનતપોજલસ્થિતમપિ સ્વાસ્તિક્યકન્દોદ્ભવમ્ ।
વેદાન્તાર્કરુચિસ્ફુટં સકલચૈતન્યસ્ફુરદ્ભ્રમ્ભરં
ત્રાણોદારમરન્દશક્તિસુખસંવિત્સત્યરૂપં ભજે ॥ ૧૫॥

દ્વૈતધ્વાન્તદિવાકરે મુરહરે મધ્વાદિવિધ્વંસકે
સત્તામાત્રશરીરિણિ પ્રિયતમે સર્વસ્ય જન્તોઃ શિવે ।
આનન્દાત્મનિ ચિન્મયે નિરુપમે મૂલપ્રકૃત્યાશ્રયે
સર્વજ્ઞે સકલેશ્વરે વિહરતુ શ્રીવેઙ્કટેશે મતિઃ ॥ ૧૬॥

શ્રીમદ્વેઙ્કટશૈલનાથ ભગવન્ મામદ્ય દીનં વિભો
શ્રામંશ્રામમપેક્ષિતાપ્તિકૃતિષુ ભ્રામ્યન્તમપ્રાપ્તિતઃ
ત્વામેવાશ્રિતલોકરક્ષણચણં સ્વામીતિ મત્વા દૃઢં
નામૈવેશ્વર તે સ્મરન્તમઘહન્નાનન્દય શ્રીપતે ॥ ૧૭॥

યસ્યાદ્રિઃ સ્પૃશતામઘાન્યપનુદત્યહ્નાય યત્સન્નિધિ-
ર્વૈકુણ્ઠાદતિરિચ્યતે યદુદરં બ્રહ્માણ્ડકોટ્યાશ્રયમ્ ।
યન્નામ સ્મરતાં મનોરથતતિઃ સાર્થૈવ યદ્ભક્તિભાગ્-
જીયાદ્ વેઙ્કટનાયકઃ સ ભગવાનસ્માન્ ભયાત્ ત્રાત્વિહ ॥ ૧૮॥

શ્રીશેષાદ્રિવિહારિણં કૃતજગત્સંરક્ષણં ચક્રિણં
શ્રીવત્સાઙ્કિતવક્ષસં કનકભાસંસ્પર્ધિસદ્વાસસમ્ ।
કસ્તૂરીઘનસારકુઙ્કુમમિલત્કાલેયકાલેપનં
કલ્યાણૈકનિકેતનં ભજ મનઃ કૌમારરૂપં હરિમ્ ॥ ૧૯॥

શ્રીમદ્વેઙ્કટનાયકસ્ય સકલપ્રાણિપ્રિયસ્ય પ્રભો-
ર્લક્ષ્મીનેતુરનન્તપુણ્યફલદસ્યોદારદાનસ્ય ચ ।
દાતુશ્ચાહમિહાસ્મિ સમ્પ્રતિ પુમર્થાર્થપ્રતિગ્રાહ્યતો
દારિદ્ર્યં ન મમાસ્તિ પુષ્કલધનગ્રામસ્ય ચર્ણં કુતઃ ॥ ૨૦॥

શ્રીકાન્તં શરદિન્દુકાન્તિહસિતં શ્રેયસ્કરં પ્રાણિનાં

પાકારિપ્રમુખામરાર્ચિતપદં પાથોજરમ્યેક્ષણમ્ ।
લોકાનાં જનનસ્થિતિપ્રલયકૃલ્લીલાવિલાસં હરિં
નાકારાતિરિપું નિરસ્તદુરિતં શ્રીવેઙ્કટેશં નુમઃ ॥ ૨૧॥

ચક્ષુર્દક્ષિણમબ્જપોષણરતં સવ્યં તદબ્જાત્મકં
પાદાવબ્જનિભૌ કરે ચ વિલસત્યબ્જં તુ યસ્યાબ્જજઃ ।
સૂનુશ્ચાબ્જનિકેતના ભગવતી પત્ની ચ નાભૌ સ્વકે
ભાત્યબ્જં ભુવનત્રયં સ ભગવાનવ્યાત્ સ શેષાદ્રિરાટ્ ॥ ૨૨॥

દીનાનાથદયાલુના ભગવતાનૂનપ્રભાવેન ચ
જ્ઞાનાનન્દઘનેન ચેતનગણત્રાણપ્રવીણેન ચ ।
શ્રીનાથેન ગુણૈકતાનતનુના શ્રીવેઙ્કટસ્વામિના
કો નામર્તિહરેણ જન્તુરધુના ન સ્યાત્ સનાથઃ કલૌ ॥ ૨૩॥

સત્યાનન્દચિદમ્બુધૌ ગુણમણિસ્થાને ચ મુક્તાશ્રયે
કારુણ્યોર્મિકલાપિનિ શ્રિતસમસ્તપ્રાણિવર્ગે તથા ।
બ્રહ્માણ્ડાક્ષયબુદ્બુદે ઘનમહામાયાવલમ્બે ત્રયી-
ઘોષે શ્રીમતિ વેઙ્કટેશજલધૌ ચેતો મદીયં પ્લવઃ ॥ ૨૪॥

યન્નામસ્મરણપ્રવીણજનતાનન્દોપભોગૈકભૂ-
ર્યત્પાદામ્બુરુહદ્વયીપ્રણતિરપ્યાપન્નિવૃત્તિપ્રદા ।
યત્સાક્ષાત્કરણં નરસ્ય પુરુષાર્થાપ્તૌ ભવેત્ કારણં
શ્રેયોદાનચણં કરાર્પણકૃતે તં વેઙ્કટેશં ભજે ॥ ૨૫॥

સુબ્રહ્મણ્યમુખોદિતસ્તુતિમિમાં શ્રીવેઙ્કટાદ્રીશિતુઃ
સૌભાગ્યોપચયપ્રદાં શ્રુતિમયીં તત્ત્વાર્થસારાવલિમ્ ।
યઃ પ્રાતઃ પ્રતિમન્દવારમનિશં ભક્ત્યા પઠેત્ સાદરં
તસ્યેષ્ટાર્થસુખાપ્તિબોધવિજયારોગ્યાયુરાપ્તિર્ભવેત્ ॥ ૨૬॥

## ૨

શ્રીવેઙ્કટાચલનિકેતનમાશ્રયામઃ
શ્રીભૂસનાથમખિલાત્મશરણ્યપાદમ્ ।
શ્રીમન્તિ યદ્ભજનશીલકુલાનિ લોકે
ધન્યાનિ ધીબલતપઃસુખકીર્તિભાઞ્જિ ॥ ૨૭॥

યત્પાદદર્શનપવિત્રિતલોચનાનાં
    યત્પુણ્યનામપરિકીર્તનપુણ્યવાચામ્ ।
શ્રેયાંસિ નિત્યસુલભાનિ નૃણાં ભવન્તિ
    શ્રીવેઙ્કટાચલપતિઃ પરિપાતુ સોઽસ્માન્ ॥ ૨૮॥

સચ્ચિત્સુખાદિદમજાયત વર્તતે ચ
    સચ્ચિત્સુખે લયમુપૈતિ જગત્ સમસ્તમ્ ।
સચ્ચિત્સુખં તદિતિ વેઙ્કટશૈલનાથ
    શુદ્ધાદ્વયં શ્રુતિરિહાહ તત્ર સ્વરૂપમ્ ॥ ૨૯॥

પૂર્ણામૃતદ્યુતિલસદ્વદનસ્ય પદ્મ-
પત્રાભદીર્ઘનયનસ્ય રમાધિનેતુઃ
શ્રીવેઙ્કટાદ્રિવસતેઃ કમનીયરૂપં
કલ્યાણદં ભવતુ લોચનગોચરં નઃ ॥ ૩૦॥

આરાધિતોઽપિ ભગવન્નધુના કલૌ ત્વં
    કિં નામ યચ્છસિ સુખં સકલાસ્તિકેભ્યઃ ।
ગોમાંસખાદિવશવર્તિનિ ભૂતલે ચ
    ગોવિપ્રસૌખ્યકરણે કિમુ બીજમસ્તિ ॥ ૩૧॥

આરોગ્યદાયિનિ તપઃ ફલદાતરિ ત્વ-
    યીશે સમસ્તજગતાં શ્રિતકલ્પવૃક્ષે ।
શ્રીવેઙ્કટાદ્રિનિલયે વરદે પ્રસન્ને
    નાહં બિભેમિ દુરિતામયદુઃખસઙ્ઘાત્ ॥ ૩૨॥

ચન્દ્રશ્ચકોરમિવ પૂર્ણતનુઃ કરૈઃ સ્વૈ-
    રાપ્યાયયત્યમૃતગુઃ સદયૈરપાઙ્ગૈઃ ।
શ્રીવેઙ્કટેશ ભગવન્ વિષયાભિલાપ-
    સન્તપ્તચિત્તમધુના પરિપાહિ માં ત્વમ્ ॥ ૩૩॥

જીવોપભોગ્યજગદાકલનાવનાદિ-
    દક્ષં દયાર્દ્રહૃદયં દયિતં રમાયાઃ ।
દામોદરં દરવિકસ્વરપુણ્ડરીક-
    પત્રેક્ષણં ભજત પન્નગભૂધરેશમ્ ॥ ૩૪॥

દીનાત્મરક્ષણનિસર્ગદયાપયોધિં
    માનાવનૈકબિરુદં નિજકિઙ્કરાણામ્ ।

શ્રીનાયકં શ્રિતભુજઙ્ગમરાજભૂધ્રં
    કો નામ નાશ્રયતિ ચિત્સુખરૂપમર્થી ॥ ૩૫॥

નેત્રોત્સવં નિખિલસાધુજનસ્ય નિત્યં
    શ્રોત્રોત્સવં શ્રુતિનુતં શ્રિતવેઙ્કટાદ્રિ ।
દિવ્યં હરેર્નિખિલજીવશરણ્યમીડે
    રૂપં ચ નામ રમણીયમનન્યયોગમ્ ॥ ૩૬॥

શ્રી શેષશૈલશિખરાભરણં રમાયાઃ
    પ્રાણપ્રિયં શ્રુતિશિરઃ સરિદીશચન્દ્રમ્ ।
વિત્તાર્થિવિત્તદમપારકૃપં પ્રપદ્યે
    શ્રીવેઙ્કટેશ્વરમખણ્ડસુખૈકતાનમ્ ॥ ૩૭॥

સંસારસાગરમપારમિહાતિતીર્ષો-
    ર્મર્ત્યસ્ય મૃત્યુમકરામયજન્તુજુષ્ટમ્ ।
શ્રીવેઙ્કટેશ્વરપદસ્મરણાહ્તેઽસ્તિ
    નાન્યઃ પ્લવઃ પ્રવિતતાધિશતાકુલસ્ય ॥ ૩૮॥

દુષ્પારકુક્ષિભરણોદ્યમદુર્વિદગ્ધં
    દુર્વારદુઃખશતદન્તુરિતાન્તરઙ્ગમ્ ।
દોષૈકતાનમતિદીનમમું દયાલો
    દેવેશ વેઙ્કટમહીધરનાથ પાહિ ॥ ૩૯॥

અજ્ઞાનપાતકમહામયશત્રુચિન્તા-
    દુઃખર્ણદોષશમનાય તવૈકમેવ ।
શ્રીવેઙ્કટેશચરિતામૃતપાનરૂપં
    દિવ્યૌષધં ન હિ તતોઽધિકમસ્તિ વિષ્ણો ॥ ૪૦॥

શ્રીવેઙ્કટેશ ભગવઞ્જગતઃ પિતાસિ
    માતા ચ મામકગુરુઃ પરિપાલકશ્ચ ।
ગર્ભસ્થિતસ્ય ભરણે જનને સહાય-
    સ્ત્વં ગર્ભિણીં ચ પરિરક્ષસિ દીનબન્ધો ॥ ૪૧॥

કન્દર્પકોટિજનકાનપિ કાંશ્ચિદીડે
    કલ્યાણજાલકલનૈકપટીયસોઽન્યાન્ ।
કલ્યાધિદાવશમનોદ્યતવૃષ્ટિધારા-
    પૂરાંશ્ચ વેઙ્કટપતેઃ કરુણાકટાક્ષાન્ ॥ ૪૨॥

શ્રીવેઙ્કટેશ ભવદીયકૃપાકટાક્ષ-
    સઞ્જીવિતસ્ય સકલેપ્સિતભોગભાજઃ ।
વિદ્વજ્જનસ્ય કલિદોષલવાપ્તિશઙ્કા
    નૈવાસ્તિ ધર્મપરિરક્ષકતા યતસ્તે ॥ ૪૩॥

કલ્યાણકલ્પતરુભિઃ કરુણ કટાક્ષૈઃ
    કઞ્જાતદર્પશમનૈઃ કલયાશુ ધન્યાન્ ।
અસ્માનનન્તધરણીધરમૌલિવાસ
    લક્ષ્મીપતે સકલલોકશરણ્ય વિષ્ણો ॥ ૪૪॥

પૂર્ણામૃતદ્યુતિલસદ્વદનાય ફુલ્લ-
    પદ્મેક્ષણાય વરદાભયપાણયેઽસ્તુ ।
શેષાદ્રિમૌલિનિલયાય રમાસખાય
    શઙ્ખારિભૃત્કરયુગાય નમઃસહસ્રમ્ ॥ ૪૫॥

વૈશ્વાનરોઽસ્યુદરગઃ સકલસ્ય જન્તો-
    ર્ભુક્તાન્નપાકરસભોજનદેહવૃદ્ધીઃ ।
કુર્વન્ ક્ષુધાં પ્રતિદિનં કુરુષે ત્વમેવ
    ભુઙ્ક્ષ્વાદ્ય વેઙ્કટપતે પરિપાહિ માં ત્વમ્ ॥ ૪૬॥

મધ્વાદિમત્તગજકુમ્ભવિદારણૈક-
    દક્ષોગ્રસિંહવપુષે પરમેશ્વરાય ।
વિદ્યામયાય ભજકાભયદાય સન્તુ
    શ્રીવેઙ્કટાદ્રિનિલયાય નમાંસિ નિત્યમ્ ॥ ૪૭॥

શ્રીવેઙ્કટેશભગવચ્ચરણં ભવાબ્ધિ-
    સન્તારણં ભજકભાવુકકારણં ચ ।
ભક્તાર્તિસંહરણમર્થિજનેપ્સિતાર્થ-
    વિશ્રાણનૈકનિપુણં શરણં ભજામઃ ॥ ૪૮॥

અર્થં હિ સર્વજનકામ્યમદુઃખલેશ-
    માનન્દમાહુરનુભૂય ચ યં મહાન્તઃ ।
તત્સાધનં ચ ભવતીત્યુભયાત્મકસ્તુ
    શ્રીવેઙ્કટાચલપતિઃ સ હિ મે પુમર્થઃ ॥ ૪૯॥

સ્રષ્ટા રજોગુણયુતઃ પરિપાલકસ્ત્વં

સત્ત્વાન્વિતશ્ચ તમસા પિહિતો નિહન્તા ।
વિશ્વસ્ય કારણમમુષ્ય ગૃણન્તિ વેદા-
સ્ત્વામેવ વેઙ્કટપતે ભગવન્ રમેશ ॥ ૫૦॥

આપન્નિવારણમનાથજનાવનૈક-
દીક્ષાધુરીણકરુણં જગતાં શર ણ્યમ્ ।
શ્રીશં શ્રિતામરતરું શશિસૂર્યનેત્રં
સેવેઽન્વહં સપદિ વેઙ્કટશૈલનાથમ્ ॥ ૫૧॥

લક્ષ્મીધવાય લસદુત્તમસદ્ગુણાય
લાવણ્યરત્નનિધયે લલિતસ્મિતાય ।
લીલાવિનિર્મિતજગત્તતિરક્ષણૈક-
શીલાય સન્તુ નતયઃ સતતં મદીયાઃ ॥ ૫૨॥

કલ્યાણમૂર્તિમખિલાઘનિવૃત્તિમૂલ-
લીલાચરિત્રમહિરાજગિરીન્દ્રવાસમ્ ।
શ્રીવેઙ્કટેશ્વરમનન્તમપારવીર્યં
સેવે શ્રિયૈ શ્રિતજને સદયં સદૈવ ॥ ૫૩॥

વિશ્વાવનવ્યસનિને નિજકિઙ્કરેષુ
વિશ્વાસિને વિહિતદુષ્ટનિબર્હણાય ।
વિદ્રાવિતાત્મરિપવે વિધિવન્દિતાય
શ્રીવેઙ્કટાદ્રિપતયેઽસ્તુ મમ પ્રણામઃ ॥ ૫૪॥

આમ્નાયમુડ્દનુજનિગ્રહદુગ્ધસિન્ધુ-
નિર્મગ્નમન્દરસમુદ્ધરણાદિ કર્તુમ્ ।
પાઠીનમૂર્તિમપિ કચ્છપવિગ્રહં ત્વાં
શ્રીવેઙ્કટેશ ભજતાં ન ભયં કદાચિત્ ॥ ૫૫॥

આનન્દમાશુ સદયં હ્યભયં વિધેહિ
રોગં નિરાકુરુ નિબર્હય ચિત્તતાપમ્ ।
શ્રીવેઙ્કટાચલપતે શરણં ત્વમેવ
દેહ્યન્નમીશ પરિપોષ્યયુતાય મહ્યમ્ ॥ ૫૬॥

શ્રીવેઙ્કટાચલપતે શરણાગતૈક-
સંરક્ષણવ્રત સમસ્તસુખૈકધામન્ ।
સચ્ચિન્મયાદ્વય સનાતન સર્વસાક્ષિન્

સર્વેશ્વરસ્ત્વમસિ માં પરિપાહિ વિષ્ણો ॥ ૫૭॥

નાથોઽસિ મામકકુલસ્ય રમાસનાથ
શ્રીવેઙ્કટેશ ભગવન્ મમ ચ પ્રભુસ્ત્વમ્ ।
ક્ષેમઙ્કરેણ વરદેન તથાભયેન
માં પાલયસ્યનિશમીશ કરેણ વિષ્ણો ॥ ૫૮॥

ઉત્પાદ્ય મામુદિતબોધલવં ચ કૃત્વા
સંવર્ધ્ય લૌકિક સુખૈરપિ કૈશ્ચિદીશ ।
શ્રીવેઙ્કટાચલપતે તવ ભક્તમેનં
નિત્યં ધિનોષિ નિજસદ્ગુણચિન્તનેન ॥ ૫૯॥

શ્રીવેઙ્કટેશ્વર શિવઙ્કર ભૂસુરાણાં
શ્રીશેષ શૈલનિલયાશ્રિતકલ્પશાખિન્ ।
શ્રેયો વિધેહિ ભગવન્ ભવદીયપાદ-
કૈઙ્કર્યલક્ષણમનન્તસુખાનુભૂતિ ॥ ૬૦॥

નામાક્ષરાણિ ભગવન્ ભવતઃ પ્રકામં
કામારિમુખ્યસુરપુઙ્ગવસેવિતાનિ ।
તન્વન્તુ સન્તતમનન્યગતેરમુષ્ય
ભર્તવ્યવર્ગભરણાર્થમનીષિતાનિ ॥ ૬૧॥

શ્રીવેઙ્કટાચલપતૌ જગતાં શરણ્યે
જીવેશ્વરે જગતિ કઃ કલિદોષસઙ્ગઃ ।
પાપપ્રસક્તિરપિ નાસ્ત્યખિલાઘહન્તૃ-
તત્પાદસેવકજનસ્ય ન કષ્ટલેશઃ ॥ ૬૨॥

શ્રીવેઙ્કટેશ્વરવિભોશ્ચરણારવિન્દં
ચક્રાઙ્કુશધ્વજસરોરુહમત્સ્યચિહ્નમ્ ।
નિત્યં ભજામિ નિરુપાધિકસૌખ્યદાયિ
નિર્નિદ્રમસ્ય જગતઃ પરિરક્ષણાદૌ ॥ ૬૩॥

સર્વાપદુદ્ધરણદીક્ષિતમસ્મદીય-
સૌભાગ્યપુઞ્જસફલીકરણપ્રભાવમ્ ।
શ્રીવેઙ્કટેશચરણં શિરસા ભજામિ
શ્રીકણ્ઠપૂર્વકસુરેશ્વરસેવ્યમાનમ્ ॥ ૬૪॥

સાનન્દમર્થિજનસાર્થકતાપહં નઃ
  સૌલભ્યમૂલમરવિન્દવિજેતૃકાન્તિ ।
શ્રીવેઙ્કટેશ્વરપદં શરણં પ્રપદ્યે
  શ્રીમન્મહાજનમનઃસદનૈકવાસમ્ ॥ ૬૫॥

આનૃણ્યમાવહતિ દુઃખમપાકરોતિ
  ચિન્તાં નિરસ્યતિ સુખં જનયત્યજસ્રમ્ ।
દૂરીકરોતિ દુરિતં શમયેચ્ચ રોગ-
  મિષ્ટં દદાતિ ફણિશૈલપતેઃ સ્મૃતિર્નઃ ॥ ૬૬॥

દૃષ્ટ્વોત્તમર્ણલિખિતાક્ષરપઙ્ક્તિમન્ત-
  ર્માનચ્યુતિવ્યસનકમ્પિતચેતસો મે ।
ચિત્તં સુખીકુરુ ચિરન્તનસૂક્તિગમ્ય
  શ્રીવેઙ્કટેશ ભગવન્નભયં વિધેહિ ॥ ૬૭॥

સ્વામિન્ મયા તવ ગુણાનવિચિન્ત્ય લોક-
  સંરક્ષણૈકનિપુણાઞ્જગતઃ શરણ્યે ।
આરોપ્ય દોષશતમસ્મ્યઘભાજનં મા-
  મેનં ત્વદેકમનસં પરિપાહિ વિષ્ણો ॥ ૬૮॥

સર્વોત્તમસ્ત્વમસિ તાવક ચિત્રલીલાઃ
  પુણ્યા ન વેદ્મિ સરહસ્યમતસ્ત્વયીશે ।
શ્રીવેઙ્કટેશ ભગવન્નપકર્ષમન્યૈ-
  રુક્તં શિવાદહમવોચમિદં ક્ષમસ્વ ॥ ૬૯॥

રુદ્રસ્ત્વમેવ ખલુ રુદ્રમથાધિકં મે
  ત્વત્તો ન વક્તુરપરાધલવોઽપિ વિષ્ણો ।
સર્વાત્મકસ્ય ન કિમસ્ત્યપકૃષ્ટતા તે
  યદ્યસ્તિ તથ્યવચસોઽસ્તુ ન મેઽપરાધઃ ॥ ૭૦॥

સચ્ચાસિ વેદવચસા ભગવંસ્ત્વમેવ
  ત્વચ્છાસિ સર્વમસિ કેવલમેક આત્મા ।
દ્વૈતં ન ચેન્મમ કથં વદતોઽપકર્ષં
  મન્તુર્મૃષા સ યદિ મદ્વદિતં તથૈવ ॥ ૭૧॥

વિષ્ણું શિવાધિકમથાનધિકં તતોઽપિ
  ન્યૂનં ગુણૈર્વિકૃતિભાગિનમબ્રુવં યત્ ।

વાગાદ્યગોચરપદે કથમસ્ય યોગઃ
    સોઽયં ન ચેન્મમ કથં દુરિતોપભોગઃ ॥ ૭૨॥

યત્પારમાર્થિકમથેદમખણ્ડબોધં
    યદ્બ્રહ્મવિષ્ણુશિવશક્ત્યખિલોપગૂઢમ્ ।
ચૈતન્યમેવ તદહં મયિ સર્વમસ્તિ
    ભાતીવ માયિકમતોઽસ્મ્યુભયં પ્રપન્નઃ ॥ ૭૩॥

યદ્વ્યાવહારિકધિયાપકલાનુભૂતં
    દ્વૈતં મૃષા ન યદિ વિષ્ણુશિવાદિભેદઃ ।
સિધ્યેત્ તદા હિ કતમાવધિ તારતમ્યં
    દોષાય તદ્વ્યવહૃતેઃ પરતો ન કિઞ્ચિત્ ॥ ૭૪॥

ત્વય્યેવ નાથ પરિકલ્પ્ય સમસ્તદોષં
    નાહં બિભેમિ ભવતા પરતન્ત્રિતાત્મા ।
મન્તુસ્તવૈવ યદિ તત્ફલભાગિનો મે
    સ્યાદસ્તુ તાત્ત્વિકમથૈક્યમિતિ ધ્રુવં નૌ ॥ ૭૫॥

આનન્દરૂપમખિલાત્મશરીરલોક-
    બીજાયિતપ્રકૃતિગં પરમાત્મતત્ત્વમ્ ।
શ્રીવેઙ્કટેશ્વરમનન્તમચિન્ત્યશક્તિં
    બ્રહ્માહમદ્વયમજસ્રમખણ્ડમીડે ॥ ૭૬॥

નારાયણસ્ય દશભિઃ શિવનન્દનસ્ય
    સ્કન્દસ્ય ષડ્ભિરખિલૈરુદિતોંઽશકૈર્યઃ ।
વિશ્વાવનાય કલિદોષનિવારણાય
    શ્રીવેઙ્કટાચલપતિઃ સ જયત્વજસ્રમ્ ॥ ૭૭॥

શ્રીવેઙ્કટેશ્વરપદામ્બુજભૃઙ્ગસુબ્ર-
    હ્મણ્યાખ્યયોગિમુખનિઃસૃતવૈખરી વા ।
વૃત્તૈર્વસન્તતિલકૈરુપચીયમાના
    દદ્યાચ્ચિરાય પઠતામખિલેપ્સિતાર્થાન્ ॥ ૭૮॥

## ૩

શ્રિયઃ કાન્તં શાન્તેર્નિલયમખિલામ્નાયવચસાં

ફલીભૂતસ્તુત્યં પરમપુરુષં ચિત્સુખમયમ્ ।
મહોદારં દૂરં દુરિતનિચયસ્યોસ્સુગુણં
શરણ્યં સર્વેષાં ભજતિ સુકૃતી વેઙ્કટપતિમ્ ॥ ૭૯॥

મહિમ્નસ્તે માર્ગં મદનજનકાનન્દસુગુણ
પ્રભો નિર્ણેતું કઃ પ્રભવતિ યતન્તેઽપિ નિગમાઃ ।
કિયન્તઃ ક્વાહં ચેદપિ મુહુરુપાસાદિતમતિઃ
સ્તુતૌ ત્વત્કારુણ્યં મુખરયતિ માં વેઙ્કટપતે ॥ ૮૦॥

ઇયત્તામેતાવાનિતિ તવ મહિમ્નઃ શ્રુતિરહો
જગાદાદ્યો નેશા વદતિ હિ યતો વાચ ઇતિ ચ ।
કથં વા તત્તાદૃગ્દુરધિગમતત્ત્વં ભગવતો
ભવેદ્ વક્તું શક્તો નરપશુરયં વેઙ્કટપતે ॥ ૮૧॥

લસન્માહેન્દ્રાશ્મચ્છવિકુલગુરૂણાં નવનભો-
ઘનશ્રીરમ્યાણાં કુવલયદલશ્યામલરુચામ્ ।
ફણીન્દ્રાદિસ્વામિપ્રતિકૃતિજુષામસ્તુ મહસાં
પ્રચારો મે દિવ્યાઞ્જનમિવ દૃગાનન્દજનકઃ ॥ ૮૨॥

મહામોહધ્વાન્તપ્રશમનવરિષ્ઠાર્કરુચયે
મહારોગવ્યાલીવિદલનવિહઙ્ગાધિપતયે ।
મહાપાપામ્ભોધિગ્રસનબડબાયૈ સ્પૃહયતે
મુહુર્મચ્ચેતઃ શ્રીફણિગિરિનિવાસાય મહસે ॥ ૮૩॥

મૃગેન્દ્રાણાં લીલાગમનકુશલત્વપ્રદગુરુઃ
સરોજાનાં લજ્જાજનકરુચિરત્વૈકશરણમ્ ।
સ્વભક્તૈકશ્રેયોવિતરણસુરદ્રુર્વિજયતે
સરસ્વત્યા સ્તુત્યઃ સ કિલ ચરણો વેઙ્કટપતેઃ ॥ ૮૪॥

મુનીન્દ્રાણાં ચેતોભવનમણિદીપચ્છવિરિયં
દરિદ્રાણાં તૃપ્તિવ્યતિકરવિધાનાક્ષયનિધિઃ ।
ત્રયીસીમન્તિન્યાશ્ચિકુરનિકુરુમ્બાભરણમ-
પ્યુદારસ્તે પાદો જયતિ ભગવન્ વેઙ્કટપતે ॥ ૮૫॥

યયોર્લાવણ્યાબ્ધૌ મુનિજનમનાંસિ પ્રતિકલં
સરોજાયન્તે શ્રીનયનરુચયો વેઙ્કટપતેઃ ।
ઝષાયન્તે નિત્યં સુકૃતસુખસંવિત્કુશલતા-

શ્ચિરં રન્તાયન્તે વિચરતુ ચ વાઙ્નશ્ચરણયોઃ ॥ ૮૬॥

દિશન્તી પ્રોલ્લાસં મુનિજનમયૂરપ્રવિતતેઃ
સૃજન્તી ભક્તાભીપ્સિતસલિલધારાશ્ચ જગતિ ।
રમાવિદ્યુદ્રમ્યા ભુજગપતિભૂભૃન્નિવસતિ-
ર્ઘનશ્યામા સા મે દુરિતભવતાપં શમયતુ ॥ ૮૭॥

દિદૃક્ષાસાફલ્યં નયનયુગલી યાસ્યતિ કદા
ફણિક્ષ્માભૃન્મૌલિપ્રથિતવસતૌ પદ્મનયને ।
દ્રુતં દૂરીકર્તું દુરિતનિચયં બુદ્ધિરપિ મે
બુભુત્સાસાર્થક્યં ચિરતરસમાપ્તૈશ્ચ સુકૃતૈઃ ॥ ૮૮॥

નમસ્કુર્મો નિત્યં નિખિલસુરકોટીરપટલી-
મણિત્વિણ્માલાભિર્મુહુરુદિતનીરાજનવિધિમ્ ।
ફણિક્ષ્માભૃન્મૌલિપ્રથિતવસતેર્વેઙ્કટપતેઃ
પદામ્બોજદ્વન્દ્વં શ્રુતિનુતશતાદ્વન્દ્વવિભવમ્ ॥ ૮૯॥

સ્વયં ન્યક્કુર્વન્તૌ રુચિરકમલાભાં નિજરૂચા
સદા સેવ્યૌ વિષ્ણો તવ હિ ચરણૌ યૌ કમલયા ।
સરાગૌ ધ્યાતવ્યૌ મનસિ હિ વિરાગૈર્નરવરૈ-
ર્મદક્ષ્ણોસ્તૌ સ્યાતાં ભજનવિષયૌ વેઙ્કટપતે ॥ ૯૦॥

તવ સ્થાનં સર્વં જગદખિલચૈતન્યવપુષઃ
સમસ્તસ્ય સ્થાનં ત્વમસિ જગતો વેઙ્કટપતે ।
બહિશ્ચાન્તર્વ્યાપ્તં સદમલમનન્તં સુખપદં
ચિદાનન્દાદ્વૈતં શિવમહમહન્ત્વેન કલયે ॥ ૯૧॥

રમાનીલાભૂમીકલિતવરિવસ્યૌ શ્રુતિશિરઃ-
સહસ્રસ્તોતવ્યૌ સકલસુરસેવ્યૌ સુરુચિરૌ ।
તપસ્વિધ્યાતવ્યાવરુણસરસીરુટ્પ્રતિભટૌ
પ્રપદ્યે પ્રત્યઞ્ચૌ ફણિપતિગિરીશસ્ય ચરણૌ ॥ ૯૨॥

નિસર્ગપ્રેમાર્દ્રં નિરવધિકસૌશલ્ય સુભગં
જગજ્જન્મસ્થેમપ્રલયકૃતિનિસ્તન્દ્રમનિશમ્ ।
ચિદાનન્દાકારં તવ હૃદયમસ્માનપિ કદા
સ્મરેદ્ યદ્યદ્ભક્તાન્ વદ યદિ કૃપા વેઙ્કટપતે ॥ ૯૩॥

ત્વમેવાસ્મદ્દૈવં તવ ભજનમસ્માકમુચિતં
વયં ત્વત્તો જાતાસ્ત્વમપિ ભરણે નઃ પતિરપિ ।
ત્વમસ્માકં શાસ્તા ગતિરપિ ચ ચૈતન્યમખિલં
ત્વદન્યો નાસ્ત્યેવ ત્વમહમહહા વેઙ્કટપતે ॥ ૯૪॥

ત્વદંશોઽહં યસ્માત્ ત્વમહમખિલાધાર ભગવન્
ત્વમાત્મા સર્વેષાં જગદુદયરક્ષાદિનિપુણઃ ।
ચિદાનન્દાકારસ્ત્વમહમુદિતાભ્યાસવિકૃતિ-
સ્તતસ્ત્વદ્દાસં મામવ ફણિમહીભૃન્નિવસતે ॥ ૯૫॥

ફણીન્દ્રઃ છત્રં તે શયનમપિ વાહઃ ખગપતિ-
ર્ધ્વજો વા ચન્દ્રાર્કૌ નયનયુગમબ્ધિર્ગૃહમપિ ।
રમાભૂમી પત્ન્યૌ તનુરપિ ચિદાનન્દસુભગા
સ્વયં ધર્મોઽસિ ત્વં જય જય ચિરં વેઙ્કટપતે ॥ ૯૬॥

કુમારસ્તે વેધાઃ સકલભુવનોત્પાદનપટુઃ
તથાનઙ્ગઃ કામપ્રભુરખિલજેતા સુમશરઃ ।
કલાનામીશિત્રી કલ્યતિ પતિં નઃ શ્રુતિમયી
સ્નુષા શ્લાઘ્યં ભાગ્યં ફણિગિરિપતે તાવક મિહ ॥ ૯૭॥

તવાકારઃ સંવિત્સુખમયશરીરસ્ય સુભગો
દૃશાં યોગિધ્યેયઃ શ્રુતિશિખરગાનાં હિ વિષયઃ ।
કથં વા મદ્દૃષ્ટ્યોઃ સુમશરસહસ્રાધિકરુચિ-
ર્વિના પુણ્યં લક્ષ્યઃ પ્રભવતિ ફણિક્ષ્માધરપતે ॥ ૯૮॥

શ્રુતિસ્ત્રીસીમન્તસ્ફુરદમલમુક્તામણિસરઃ
સ્વપાદાવિર્ભૂતધુસરિદુરુપૂરઃ કિમથવા ।
ફણિક્ષ્માભૃન્નેતુશ્ચરણનખરાણાં ધવલિમા
વિતર્કં મદ્બુદ્ધેરુપદિશતિ મોહં શમયતિ ॥ ૯૯॥

અન્તર્યામી ત્વમસિ ભગવન્નસ્ય સર્વસ્ય જન્તોઃ
સર્વં વ્યાપ્નોપ્યખિલમહહ ત્વં પદેનૈકકેન ।
વિશ્વં વિષ્ણો વરદ પરમસ્ત્વં તતસ્ત્વાં પ્રપદ્યે
કારુણ્યાબ્ધે કલિકલુષિતં પાહિ માં વેઙ્કટેશ ॥ ૧૦૦॥

સુબ્રહ્મણ્યમુખોદિતસ્તુતિમિમાં ભક્ત્યા પઠન્તોઽન્વહં
બ્રહ્મણ્યસ્ય જગદ્ગુરોર્ભગવતઃ શ્રીવેઙ્કટેશપ્રભોઃ ।

દેવેશસ્ય રમાપતેઃ કરુણયા વિષ્ણોઃ સુખં ભાવુકં
    પુણ્યં કીર્તિમનામયં ચિરતરાયુઃ પ્રાપ્નુવન્તિ ધ્રુવમ્ ॥ ૧૦૧॥

## ૪

લીલામૂલં નાથ તે નૈવ વિઘ્નઃ
    કાલે દેશે કર્મયોગે વિચિત્રમ્ ।
દોષૈર્જુષ્ટં દોષહીનં ગુણાઢ્યં
    નિશ્ચેતવ્યં તત્ કથં વેઙ્કટેશ ॥ ૧૦૨॥

વેદૈઃ શાસ્ત્રૈર્યોગિભિઃ શિષ્ટવૃન્દૈઃ શસ્તં લીલાજાલમુક્તં તવૈવ ।
દોષૈર્હીનં સદ્ગુણાઢ્યં વિચિત્રં તત્ પ્રત્યેમિ શ્રીપતે વેઙ્કટેશ ॥ ૧૦૩॥

સચ્ચિન્માત્રં શુદ્ધમદ્વૈતતત્ત્વં બ્રહ્મજ્યોતિર્નિર્ગુણં ત્વં હિ વિષ્ણો ।
માયાધ્યાસાદીશ્વરઃ સદ્ગુણૌઘૈઃ પૂર્ણઃ સાક્ષાદ્ વેઙ્કટાદ્રીશ્વરોઽસિ ॥ ૧૦૪॥

ધર્માત્માનં સત્યસન્ધં દયાલું સર્વાધારં સર્વગં સર્વવન્દ્યમ્ ।
વિશ્વાકારં વિશ્વવેદ્યં મુકુન્દં વિષ્ણું સાક્ષાદ્ વેઙ્કટેશં ભજામઃ ॥ ૧૦૫॥

વૃત્તીરન્તશ્ચોદયસ્યન્તરાત્મન્
    માતેવ ત્વં રક્ષસિ શ્રીનિવાસ ।
શ્રેયઃ પ્રાપ્તૌ તાતવત્ ત્વં નિયોક્ષ્ય-
    સ્યસ્માન્ વિષ્ણો ન ત્વદન્યોઽસ્તિ નાથઃ ॥ ૧૦૬॥

દત્ત્વા વિત્તં દીનલોકાય વિષ્ણો કૃત્વા ચાન્તઃ પ્રેરણં કાર્યજાતે ।
જ્ઞાત્વા તત્તદ્બુદ્ધિતસ્ત્વં ફલાનિ શ્રીમચ્છેષાદ્રીશ યચ્છસ્યુદાર ॥ ૧૦૭॥

જીવઞ્જીવં યદ્વદિન્દુઃ કરૈઃ સ્વૈઃ
    ભાસ્વાન્ કોકીકોકયુગ્મં યથોસ્રૈઃ ।
તદ્વચ્છ્રીમાન્ વેઙ્કટેશ ત્વદક્ષ્ણો-
    ર્લીલાપાઙ્ગૈઃ પાહિ માં સાનુરાગૈઃ ॥ ૧૦૮॥

સદ્રૂપસ્ત્વં સત્ત્વદાતાસિ વિષ્ણો ચિદ્રૂપત્વાચ્ચેતનાં મે પ્રયચ્છ ।
આનન્દસ્ત્વં શર્મ દેહીશ્વરં ત્વાં સેવે શ્રીશં શેષશૈલાધિવાસમ્ ॥ ૧૦૯॥

સર્વવ્યાપિ સ્વપ્રકાશસ્વરૂપં સત્તામાત્રં સંવિદાનન્દપૂર્ણમ્ ।
બ્રહ્મૈવેદં માયયા મૂર્તમેકં જીવોપાસ્યં વેઙ્કટેશાભિધાનમ્ ॥ ૧૧૦॥

નાહં કર્તા કારયત્યન્તરાત્મા વિષ્ણુઃ શેષાદ્રીશ્વરો વેદવેદ્યઃ ।
કર્માનાદિ પ્રાકૃતં મે નિમિત્તં ભોગપ્રાપ્તૌ તત્સ્વભાવો હિ તાદૃક્ ॥ ૧૧૧॥

દેહારામે ચિત્તવૃત્ત્યાખ્યભૂમૌ
સત્સઙ્ગત્યા સાધુકૃષ્યોચિતાયામ્ ।
ભક્તિશ્રદ્ધાધાલવાલે ગુરૂક્તં
બીજં શ્રીમદ્વેઙ્કટેશસ્ય મન્ત્રઃ ॥ ૧૧૨॥

ધ્યાનં વૃક્ષસ્યાઙ્કુરં નિત્યપૂજા-
કાણ્ડો મન્ત્રાવર્તયો યસ્ય શાખાઃ ।
શેષાદ્રીશસ્યોત્સવાદીનિ પર્ણા-
ન્યાનન્દાખ્યં ચિદ્રસં સત્ફલં નઃ ॥ ૧૧૩॥

સુબ્રહ્મણ્યપ્રસ્તુતઃ શ્રીનિવાસઃ
સિદ્ધાન્તાર્થઃ સર્વવેદાન્તવાચામ્ ।
સ્તોત્રં ચૈતદ્ યે પઠન્તિ પ્રભાતે
પાયાદ્ ભક્તાન્ તાનજસ્રં દયાલુઃ ॥ ૧૧૪॥

## ૫

શ્રીનિવાસં ભજે મૌનિહૃન્મન્દિરં
વેઙ્કટાદ્રીશ્વરં વેદવેદ્યં હરિમ્ ।
કામિતાર્થપ્રદં સ્વામિનં સર્વદા
ભૂમિદેવપ્રિયં સ્તૌમિ નૌમિ સ્વયમ્ ॥ ૧૧૫॥

શેષગિરિભૂષણમશેષજગદીશં
દોષગણશોષણવિશેષિતમનીષમ્ ।
ભાષિતવિશેષકૃતસુશ્રુતિસમૂહં
શેષશયનં ભજ સદા વેઙ્કટેશમ્ ॥ ૧૧૬॥

શેષગિરીશ્વર શશ્વત્કામં શિવમાકલ્યાન્તર્યમયન્ ।
મામકમીશ્વર માધવ વિષ્ણો મોહમપાકુરુ મે કુરુ બોધમ્ ॥ ૧૧૭॥

દીનજનાવનદીક્ષિતમીડે માનદમસ્મત્કુલદૈવમ્ ।
સ્વામિનમહિપતિગિરિકૃતવસતિં કામિતદાતારં શ્રીશમ્ ॥ ૧૧૮॥

શરણાગતજનભરણાદરણપ્રવરં સદ્ગુણગણશરણમ્ ।

ફણિપતિધરણીધરવરભૂષણચરણં ભજ ભોઽન્તઃકરણ ॥ ૧૧૯॥

ક્ષરાદતીતોઽક્ષરતોઽપ્યતીતો વિષ્ણો યતોઽતઃ પુરુષોત્તમોઽસિ ।
શરીરશાયી પુરુષોઽહમસ્મિ તન્મામહીન્દ્રાદ્રિપતે પુનીહિ ॥ ૧૨૦॥

સત્સઙ્ગમૂલાં સુકૃતાલવાલાં શ્રદ્ધાઙ્કુરાં ભક્તિરસપ્રવૃદ્ધામ્ ।
દયાપ્રસૂનાં શ્રિતવેઙ્કટાદ્રિં વિજ્ઞાનવલ્લીં સુખસત્ફલાં ભજે ॥ ૧૨૧॥

નિજનામજપપ્રવૃત્તલોકાવનશૌણ્ડેન દયામયેન દેવ ।
વરવેઙ્કટનાથમૂર્તિભાજા ભવતાસ્મન્નયનાનિ સાર્થકાનિ ॥ ૧૨૨॥

સફલીકૃતદર્શનાર્થિચક્ષુસ્તવ સૌન્દર્યમહીન્દ્રશૈલનાથ ।
શ્રુતિસાર્થકતાવહં ચ નામ શ્રુતિમૌલીશતસંસ્તુતં ચ જીયાત્ ॥ ૧૨૩॥

યાવત્ ક્રિયાઃ કર્તુમશક્નુવાનઃ કુર્વન્ યથાશક્તિ નરો ન દુષ્યતિ ।
તથા પ્રતિજ્ઞાતમથોપવાસં મયેતિ જાનીહ્યુરગાદ્રિનાથ ॥ ૧૨૪॥

પરં પરસ્માત્ પુરુષં પુરાણં પદ્મેક્ષણં ચિત્સુખસત્યલક્ષણમ્ ।
શ્રીવેઙ્કટાદ્રીશ્વરમાશ્રયામશ્ચિરન્તનં યોગિજનાત્તચિન્તનમ્ ॥ ૧૨૫॥

વેઙ્કટપતિપદપઙ્કજભક્તઃ સઙ્કટમુક્તઃ સત્યનિયુક્તઃ ।
સર્વજનોત્તમતાં સમુપૈતિ સ્વામી ભૂમેર્ભવિતા ધન્યઃ ॥ ૧૨૬॥

સ્વામિન્ વેઙ્કટરમણ શ્રીમન્ કામિતદાનધુરીણ વિભો ।
મામતિદીનં પાલય દયયા સ્તૌમિ તવાઙ્ઘ્રિદ્વયમેવ ॥ ૧૨૭॥

સેવે શેષાદ્રીશં ભક્ત્યા દોષાતીતં તોષં પ્રાપ્તુમ્ ।
શ્રીભૂમીશં શ્રીદં નૃણાં સાભિપ્રાયામ્નાયૈર્ગમ્યમ્ ॥ ૧૨૮॥

સાક્ષાદ્ વિષ્ણું લક્ષ્મીકાન્તં પ્રેક્ષાલક્ષ્યં મોક્ષાધીશમ્ ।
પક્ષીડ્વાહં રક્ષાધુર્યં દ્રક્ષ્યામ્યેકં કુક્ષૌ યન્મે ॥ ૧૨૯॥

ક્ષેત્રં શ્રીવેઙ્કટાદ્રિઃ શ્રિતતરુદૃષદો ધાતવો દેવરૂપા-
સ્તત્ત્વાનિ પ્રાણિનઃ સ્યુસ્તનુકરણગતા દેવતા દેવતાશ્ચ
વિપ્રાદ્યા ભોજનાર્થં પ્રતિદિનનિયતં પૂજનં વેઙ્કટેશઃ
ક્ષેત્રજ્ઞસ્તત્ર ચૈતન્યમખિલપરિપૂર્ણં પરં બ્રહ્મ સત્યમ્ ॥ ૧૩૦॥

ત્વન્નામ સ્મરતામઘૌઘશમનં ત્વદ્ભક્તિભાજાં સદા
યોગક્ષેમસમૃદ્ધિરીપ્સિતફલપ્રાપ્તિર્નિરાયાસતઃ ।
ત્વત્સેવાધિગતાત્મબોધકગુરુશ્રીપાદુકાર્ચાવતાં

બ્રહ્મપ્રાપ્તિરપિ પ્રસિદ્ધમખિલં શ્રીવેઙ્કટાદ્રીશ્વર ॥ ૧૩૧॥

સુરક્ષિતશ્ચાસ્મિ તવાશ્રયાદહં જગત્પ્રભો દીનશરણ્ય વિષ્ણો ।
પાલ્યસ્ત્વયેતશ્ચ સદૈવ સાદરં ત્રાતા ન ચાન્યો મમ વેઙ્કટેશ ॥ ૧૩૨॥

દૂરં દુરાપં ચ દુરાત્મનાં હરિં પારે ગિરાં સ્વાનુભવૈકલભ્યમ્ ।
હિરણ્યગર્ભાદ્યમરાર્ચિતાઙ્ઘ્રિં વરં શ્રિયઃ શેષગિરૌ શ્રયામઃ ॥ ૧૩૩॥

ઉરગપતિશિખરિશિખરાકલિતવસતિં
ચરણનતજનસુહિતકરણચણકરુણમ્ ।
વરદમુરુસુગુણગણપરિકલિતદિવ્યા-
ભરણમતસીસુમસમાનરુચિમીડે ॥ ૧૩૪॥

ચિદાનન્દરૂપં સદાત્મસ્વરૂપં નિરાકારમાદ્યં પરાકારવેદ્યમ્ ।
જગદ્વૃક્ષબીજં સમં દેવભાજં ભવાધિપ્રણાશં ભજે વેઙ્કટેશમ્ ॥ ૧૩૫॥

ત્રયીચોરહન્તા મહીધ્રસ્ય ધર્તા મહીગોલભર્તા મહાદૈત્યભેત્તા ।
બલેર્ભૂમિહર્તા નૃપત્રાતકર્તા દશગ્રીવહન્તા હરિર્વેઙ્કટેશઃ ॥ ૧૩૬॥

કલિન્દાત્મજાખેલનઃ કંસહન્તા કલૌ દૈત્યસઙ્ઘસ્ય સમ્મોહકર્તા ।
કુરાજવ્રજધ્વંસનઃ કોઽપિ કલ્કી હરિર્વેઙ્કટેશો હરત્વસ્મદાર્તિમ્ ॥ ૧૩૭॥

અનાથસ્ય નાથસ્ત્વમેવાસિ વિષ્ણો સનાથસ્ત્વયાહં ન મેઽન્યોઽસ્તિ નાથઃ ।
અથાનૃણ્યમારોગ્યમાયુઃ સુખં મે ત્વમેવ પ્રયચ્છ પ્રભો વેઙ્કટેશ ॥ ૧૩૮॥

મનો મે સમાધત્સ્વ માં પાહિ વિષ્ણો મહાક્રોધજુષ્ટં મહામોહદુષ્ટમ્ ।
મુહુર્મીનકેતુપ્રભાવાપકૃષ્ટં નિકૃષ્ટસ્વભાવં ભવદ્ભક્તમીશ ॥ ૧૩૯॥

મમારોગ્યમાયુષ્યમાનૃણ્યમર્થં યશઃ પુણ્યમાનન્દમીશ પ્રયચ્છ ।
પ્રપન્નાર્તિહારિન્ પ્રભો વેઙ્કટેશ પ્રસીદ ત્વદેકાવલમ્બસ્ય વિષ્ણો ॥ ૧૪૦॥

વિષ્ણો મામવ વિસ્મૃતિશીલં વિશ્વવ્યાપક માં પાહિ ।
વેઙ્કટનાયક વેત્સિ સમસ્તં વેત્તૃત્વં મે દેહિ વિભો ॥ ૧૪૧॥

વરાભયદરારિભૃત્કરસરોજમારાધયે
પુરાન્તકસુરાધિપદ્વિરદવક્ત્રપૂર્વાર્ચિતમ્ ।
ગિરામતિતરામુરઃસરવરાત્મકે સર્વદા
વિરાજદુરુવિગ્રહં વરદમર્થિનાં શ્રીપતિમ્ ॥ ૧૪૨॥

કૃપારસકરમ્બિતાન્ કમલસુન્દરાનિન્દિરા-

કપોલ પરિચુમ્બિનઃ કલુષહારિણઃ કાઙ્ક્ષયે ।
કલૌ કુશલદાયિનઃ કલિત ભોગિરાડ્ભૂધરાન્
કટાક્ષસુભગોદયાન્ પરમપૂરુષસ્યાન્વહમ્ ॥ ૧૪૩ ॥

શ્રીમદ્વેઙ્કટનાયક ભગવન્ કામિતદાનધુરીણ વિભો ।
ચામીકરનિભચેલવિરાજિત ભૂમીવવ મામવ સદયમ્ ॥ ૧૪૪ ॥

પન્નગરરાજમહીધરમસ્તકસન્નિહિતાવિર્ભાવસ્ય ।
ચિન્મયમૂર્તિ ચેતસિ કલયન્ તન્મયતામાપ્નોતિ નરઃ ॥ ૧૪૫ ॥

શેષગિરીન્દ્રં શ્રિતવતિ દેવે દોષવિહીને દુરિતારૌ ।
સર્વાર્થેશે સાક્ષિણિ ભગવતિ સર્વસ્વં તે કુરુ ચેતઃ ॥ ૧૪૬ ॥

ઘટાદેઃ કુલાલઃ પટાદેઃ કુવિન્દો
ગૃહાદેશ્ચ કારુર્યથા લોકદૃષ્ટઃ ।
પ્રપઞ્ચસ્ય કર્તા તથા વેદદૃષ્ટ-
સ્ત્વમેવાસિ વિષ્ણો ફણીન્દ્રાદ્રિવાસિન્ ॥ ૧૪૭ ॥

યથા સ્વાપ્નિકસ્ય પ્રપઞ્ચસ્ય કર્તા
શરીરાભિમાની શ્રુતસ્તૈજસાત્મા ।
તથા જાગ્રતોઽપિ ત્વમેવાસિ વિશ્વ-
સ્ત્વદન્યોઽસ્તિ કો વા હરે વેઙ્કટેશ ॥ ૧૪૮ ॥

ન મે કિઞ્ચિદસ્તિ ત્વદીયં હરે સ્વં સ્વતન્ત્રસ્ત્વમેવાહમસ્મિ ત્વદીયઃ ।
અતશ્ચાસ્વતન્ત્રત્વતઃ કિં નુ કુર્યાં ત્વદીયાં સપર્યાં કથં વેઙ્કટેશ ॥ ૧૪૯ ॥

કલૌ વેઙ્કટેશાત્ પરં નાસ્તિ દૈવં
યતસ્તસ્ય ભક્તા જયન્તિ પ્રકામમ્ ।
ન તેષાં પરાભૂતિરાત્માખિલાનાં
તમીશં ભજામો હરિં શ્રીનિવાસમ્ ॥ ૧૫૦ ॥

ભજે વેઙ્કટેશં ભવભ્રાન્તિનાશં સુરાણામધીશં સુપુણ્યોપદેશમ્ ।
વિહઙ્ગેશવાહં વિનિર્મુક્તમોહં ચિદેકપ્રવાહં મુદે યામિ સોઽહમ્ ॥ ૧૫૧ ॥

કલૌ યુગે વેઙ્કટનાયકસ્ય કલ્યાણમૂર્તેઃ કમલાશ્રયસ્ય ।
નામસ્મૃતિઃ સર્વરુજાપહન્ત્રી સ એવ દેવો ભિષજાં ભિષક્તમઃ ॥ ૧૫૨ ॥

શ્રીવેઙ્કટેશં સ્મરતાં ન રોગઃ શ્રીવેઙ્કટેશં ભજતાં ન દુઃખમ્ ।
શ્રીવેઙ્કટેશં નમતાં ન ભીતિઃ શ્રીવેઙ્કટેશં વિદુષાં ન ચિન્તા ॥ ૧૫૩ ॥

શ્રીનિવાસ જગતાં નિવાસ તે માનવાકૃતિમિવાશ્રિતં વપુઃ ।
દીનરક્ષણવિધાનદીક્ષિતં ધ્યાનગોચરમિહાસ્તુ મે સદા ॥ ૧૫૪॥

શ્રિયઃ કટાક્ષૈરભિષિક્તમૂર્તિં પયઃપયોધૌ વટપત્રશાયિનમ્ ।
વિભાવયે વેઙ્કટશૈલમસ્તકે વિભ્રાજમાનં હરિનીલભાસા ॥ ૧૫૫॥

શ્રિયઃ સહાયં શ્રિતકલ્પભૂજં શેષાદ્રિગં દોષવિવર્જિતં હરિમ્ ।
સમસ્તલોકૈકશરણ્યમચ્યુતં સુખૈકતાનં શરણં ભજામઃ ॥ ૧૫૬॥

શ્રીશેષશૈલં શ્રિતકલ્પસાલં શ્રીવેઙ્કટાખ્યં શ્રુતપુણ્યમુખ્યમ્ ।
વન્દે હરિર્યત્ર વસત્યજસ્રં વન્દારવો યસ્ય સુરાઃ સહસ્રમ્ ॥ ૧૫૭॥

ત્રયીમયી યસ્ય હિ પુણ્યમૂર્તિસ્ત્રયન્તકૂટોઽવતુ વેઙ્કટો નઃ ।
યત્રૈવ નિત્યં રમતે રમેશો ધાત્રાદિભિર્દેવગણૈરુપાસ્યઃ ॥ ૧૫૮॥

સુરાલયાદેષ સુવર્ણશૈલાત્ કૈલાસતો વાપિ હિમાલયાદ્વા ।
વિન્ધ્યાત્ પુનર્મન્દરતોઽપિ રમ્યઃ શ્રીવેઙ્કટાર્વિરદશ્ચ પુણ્યઃ ॥ ૧૫૯॥

યત્રોદકં વિષ્ણુપદાનુષઙ્ગાદ્ ગઙ્ગામ્ભસોઽપ્યુત્તમતીર્થમાહુઃ ।
પુરાણવાક્યાનિ સ વેઙ્કટાદ્રિઃ પુનાતુ પુષ્યઃ કલિકાલિકાન્નઃ ॥ ૧૬૦॥

યદાશ્રિતાનામનઘત્વસિદ્ધિર્યત્રત્યતીર્થામ્બુનિષેવણેન ।
ઐરમ્મદીયામૃતલભ્યલાભઃ સ વેઙ્કટાદ્રિઃ સુલભો મમાસ્તુ ॥ ૧૬૧॥

ભાનુપ્રભામણ્ડલભાસુરાણિ ભાસ્વન્તિ કાર્તસ્વરકાન્તિતોઽપિ ।
જ્યોતીંષિ શેષાચલશ ૃઙ્ગભાઞ્જિ જ્વરં હરન્ત્વીક્ષણમાત્રતો નઃ ॥ ૧૬૨॥

ઘનાશ્રયત્વાદ્ ઘનસારશીતઃ પ્રવાતિ વાતઃ પ્રચુરો હિ યત્ર ।
તત્રૈવ વાસોઽસ્તુ નિરન્તરં મે શ્રીવેઙ્કટાદ્રૌ શ્રિતતાપહારિણિ ॥ ૧૬૩॥

યત્રોપલા દૈવતમૂર્તિકલ્પાઃ કલ્પદ્રુકલ્પાસ્તરવોઽપ્યનલ્પાઃ ।
સુપુષ્કલં પુષ્કરિણીજલં ચ નઃ સાર્થતીર્થોઽસ્તુ સ વેઙ્કટાદ્રિઃ ॥ ૧૬૪॥

અધિત્યકાયામમરાધિવાસપ્રસાધિતાયાં પુરુષોત્તમસ્ય ।
વિરાજતે યત્ર વિહારભૂમિઃ સ વેઙ્કટોઽદ્રિઃ શરણં મમાસ્તુ ॥ ૧૬૫॥

ગુહાશયે યત્ર હરિર્વિરાજતે ગજેન્દ્રસન્તોષકરઃ સુશાન્તઃ ।
નાન્યત્ર તસ્માદવિરોધયુક્તઃ શ્રીવેઙ્કટાદ્રિં શરણં ભજામઃ ॥ ૧૬૬॥

મહર્ષિસેવ્યં મનુજૈરુપાસ્યં મુકુન્દમુખ્યૈરમરૈરધિષ્ઠિતમ્ ।

મૂલં મહિમ્નો મહસાં નિન્દાનં મહાફણીન્દ્રાદિમહં ભજામિ ॥ ૧૬૭॥

વિહારભૂમિર્વનમાલિનોઽયં વિલાસહેતુઃ કમલાધિનેતુઃ ।
વિવેકિનાં વેઙ્કટનામકોઽદ્રિર્વેદાત્મકત્વં વિવૃણોતિ હિ સ્વમ્ ॥ ૧૬૮॥

શ્રીસ્વામિનઃ પુષ્કરિણીતટસ્થમશ્વત્થરૂપં પ્રણમામિ દેવમ્ ।
યત્સન્નિધૌ ભક્તજનસ્ય નિત્યં ભવન્તિ કર્માણિ શુભપ્રદાનિ ॥ ૧૬૯॥

ભૂતાનિ ભેતાલપિશાચયક્ષપ્રેતાનિ શેષાદ્રિનૃસિંહતીર્થે ।
યઃ સ્નાતિ તદ્દેહમપાસ્ય મુક્તિં પ્રયાન્તિ રક્ષાંસિ ચ તત્ક્ષણેન ॥ ૧૭૦॥

ગોવિપ્રનારીશિશુસર્પહત્યાનાસ્તિક્યતત્કાર્યભવાન્યઘાનિ
શ્રીવેઙ્કટાદ્રૌ કપિલસ્ય તીર્થં નિષેવ્ય નશ્યન્તિ નરસ્ય તત્ક્ષણાત્ ॥ ૧૭૧॥

તચ્ચક્રતીર્થં સ્મૃતિમાત્રતો યદ્ રુગ્ણસ્ય રોગાર્તિમપાકરોતિ ।
તીર્થં ચ શઙ્ખસ્ય સુખાય યત્ર સ વેઙ્કટાદ્રિઃ સુખયત્વિહાસ્માન્ ॥ ૧૭૨॥

યત્પુષ્કરિણ્યામવગાહ્ય મર્ત્યઃ પાપાનિ સર્વાણિ વિધૂય સદ્યઃ ।
યોગ્યો ભવેદ્ વેઙ્કટનાથમીક્ષિતું સ વેઙ્કટાદ્રિઃ શરણં મમાસ્તુ ॥ ૧૭૩॥

યદીયસોપાનમુપારુરુક્ષોર્ભવેન્મુમુક્ષોરિવ ભૂમિકાભિઃ ।
વિશ્રામભૂમિશ્ચ મરુત્પથસ્થં શ્રીગોપુરં નઃ સ પુનાતુ વેઙ્કટઃ ॥ ૧૭૪॥

અધિત્યકાયામરવિન્દનાભશ્રીમૂર્તિનિત્યોત્સવયોગ્યરૂપં
વેદાન્તવાક્યાર્થમયં વિમાનં વિરાજતે યસ્ય સ વેઙ્કટાદ્રિઃ ॥ ૧૭૫॥

દૈનન્દિના વારવિશેષલક્ષ્યાઃ પક્ષોદિતા માસગતાશ્ચ વાર્ષિકાઃ ।
મહોત્સવા યત્ર હરેરનર્ગલાઃ ભવન્તિ તં વેઙ્કટશૈલમાશ્રયે ॥ ૧૭૬॥

સમસ્ત દેશાગતભક્તસઙ્ઘૈઃ કરાર્પણદ્રવ્યસમર્પણાય ।
યઃ પ્રત્યહં પૂર્ણતનુસ્તમદ્રિં શ્રીવેઙ્કટાખ્યં શરણં ભજામઃ ॥ ૧૭૭॥

ઉપાસકાર્થાર્પણયોગ્યરૂપં કટાહયુગ્મં પુરતઃ શ્રિયઃ પતેઃ ।
નિરન્તરં નાણકનાદદન્તુરં પ્રકાશતે યત્ર સ વેઙ્કટાદ્રિઃ ॥ ૧૭૮॥

સુરાઃ પરં ભૂસુરરૂપમેત્ય બ્રહ્મોત્સવે યત્ર હરિં દિદૃક્ષવઃ ।
પ્રત્યક્ષમેષ્યન્તિ કલૌ તમાશ્રયે શ્રિયઃ પતેરાયતનં ગિરીન્દ્રમ્ ॥ ૧૭૯॥

કલૌ યુગે કામરતસ્ય જન્તોર્ભક્તસ્ય સઙ્કલ્પિતસાધનાય ।
દયા બભૂવેશિતુરઞ્જનાદ્રૌ સા મૂર્તિમત્યસ્મદભીષ્ટદા સ્યાત્ ॥ ૧૮૦॥

ભદ્રાત્મને ભદ્રકરાય દેહિનાં ગરુત્મદુદ્યદ્રથકેતનાય ।
વરપ્રદાયાઞ્જનશૈલગાય તેજસ્વિને શ્રીપતયે નમોઽસ્તુ ॥ ૧૮૧॥

તવેઙ્ગિતં વેત્તુમિહાખિલેશ પ્રકલ્પતે કઃ ફણિશૈલમૌલેઃ ।
તટે નિષણ્ણસ્ય રમાધિનેતુઃ સ્વશક્તિલેશેન જગન્તિ શાસતઃ ॥ ૧૮૨॥

શ્રિયઃપતે જીવગણસ્ય દેહં જ્ઞાનં ચ તત્સાધનસાધ્યભોગ્યાન્ ।
પ્રાદાઃ પુરા ત્વં કૃપયા મમાપિ ત્વમેવ નાથઃ પરિપાહિ માં ત્વમ્ ॥ ૧૮૩॥

અદ્યાશનં દેહિ જગન્નિવાસ ત્વદેકનાથાય ચ વેઙ્કટેશ ।
દાસાય મહ્યં મુહુરર્થિને ત્વાં સ્મૃત્વાપ્નુવન્તીપ્સિતમેવ સન્તઃ ॥ ૧૮૪॥

ઇન્દિન્દિરેન્દીવરમેચકેન વૃન્દારકેન્દ્રાર્ચિતપાદુકેન ।
ચન્દ્રદ્યુતિદ્યોતિદરસ્મિતેન શ્રીવેઙ્કટેશેન વયં સનાથાઃ ॥ ૧૮૫॥

યચ્ચિન્તિતં દુષ્કૃતમેવ ચેતસા પાપં મયોક્તં વચસા ચ યત્ કૃતમ્ ।
કાયેન તત્ સર્વમઘં ક્ષમસ્વ શ્રીવેઙ્કટેશાશ્રિતરક્ષક ત્વમ્ ॥ ૧૮૬॥

અનન્તકલ્યાણગુણાકરસ્ય શેષાચલેશસ્ય પદાબ્જભક્તિઃ ।
અનન્તકલ્યાણસુખં તનોતિ જન્તોરશેષસ્ય જગત્ત્રયેઽસ્મિન્ ॥ ૧૮૭॥

શ્રિયઃપતે વેઙ્કટનાયકશ્ચ કલૌ યુગે ત્વં વરદોઽસિ નૃણામ્ ।
અસ્મત્કુલાધીશ્વરમીપ્સિતાસ્યૈ સર્વેશ્વરં ત્વાં શરણં ભજામઃ ॥ ૧૮૮॥

ધનં નમત્સર્વસુખૈકમૂલં ધનાય સર્વેઽપિ સદા યતન્તે ।
ધનં પ્રયચ્છ પ્રિયમદ્ય મહ્યં ધનેશ્વરસ્ત્વં ખલુ વેઙ્કટેશ ॥ ૧૮૯॥

સચ્ચિત્સુખાખણ્ડરસૈકરૂપં સાક્ષાત્ પરબ્રહ્મ ગિરાં દુરાપમ્ ।
શ્રીવેઙ્કટેશં શ્રિતદુઃખનાશં શ્રિયઃ પતિં મદ્ગતિમાશ્રયામઃ ॥ ૧૯૦॥

મઙ્ગામ્બિકાજાનિરમન્દબોધમાહાત્મ્યસમ્પત્સુખશક્તિરૂપઃ ।
મહીન્દિરાભ્યાં પરિસેવ્યમાનઃ શ્રીવેઙ્કટેશો મુદમાતનોતુ ॥ ૧૯૧॥

સત્યોદ્ભવાં સંવિદુદારકાણ્ડાં સત્કર્મપુષ્પાં સુકૃતપ્રવાલામ્ ।
આનન્દપૂર્ણામૃતસત્ફલાઢ્યાં શેષાચલે કલ્પલતાં ભજામઃ ॥ ૧૯૨॥

જીવા ન જીવન્તિ બિના ભવન્તં લોકૈક સઞ્જીવન જીવસાન્ક્ષમ્ ।
સ્વાધીનમાયં પરમેશ્વરં ચ શ્રીવેઙ્કટાદ્રીશ નિરસ્તમાય ॥ ૧૯૩॥

સચ્ચિત્સુખાખણ્ડમયાત્મમૂર્તે સર્વજ્ઞ સર્વેશ્વર દિવ્યશક્તે ।
લક્ષ્મીપતે વેઙ્કટશૈલનાથ વિલોક્યાસ્માન્ સદયૈરપાઙ્ગૈઃ ॥ ૧૯૪॥

અનન્તકલ્યાણગુણૈકધામા સમાઞ્ચિતાચિન્ત્યવિચિત્રભૂમા ।
પારમ્યસીમાન્વિતસત્યભામા શેષાચલે કાચન કોઽપિ ભાતિ ॥ ૧૯૫॥

સમાનશૂન્યોઽપ્યધિકેન હીનો રમાસનાથો જગતાં સહાયઃ ।
પુમાન્ પુરાણઃ શ્રિતવેઙ્કટાદ્રિર્મમાસ્તુ નિત્યં શરણં દયાલુઃ ॥ ૧૯૬॥

સર્વાત્મનાં તુલ્યદૃગીશ્વરસ્ત્વં સ્વામી સહાયં કુરુષે પિતેવ ।
તથાપ્યહોઽપ્યાશ્રિતપક્ષપાતી કુતોઽસિ ભો વેઙ્કટશૈલનાથ ॥ ૧૯૭॥

ફલાભિસન્ધ્યા ત્વશનાદ્યભાવં તપો ભવેન્નાનશનં હિ કિં તુ ।
ત્યાગઃ ફલસ્ય ત્વયિ વેઙ્કટેશ તપસ્તદેવાનશનં હિ મન્યે ॥ ૧૯૮॥

શ્રીવેઙ્કટેશં શ્રિતદુઃખનાશં કૃતાવતારં કલિતારણાય ।
મુકુન્દમાદ્યં મુનિવૃન્દવન્દ્યં મધ્વાદિવિધ્વંસકમાશ્રયામઃ ॥ ૧૯૯॥

શ્રિયઃપતે વેઙ્કટશૈલનાથ સર્વજ્ઞ સર્વેશ્વર સર્વશક્તે ।
સર્વાન્તરાત્મન્નરવિન્દનેત્ર સ્વામિન્ પદં તે શરણં પ્રપદ્યે ॥ ૨૦૦॥

શ્રીવેઙ્કટેશાહ્વયમાશ્રયામશ્ચિન્તામણિં સત્સુખચિત્સ્વરૂપમ્ ।
ફણીન્દ્રશૈલસ્ય ફણામણિર્યથા વિરાજતેઽનર્ઘ્યગુણઃ સદા યઃ ॥ ૨૦૧॥

જગત્પતિર્વેઙ્કટશૈલગમ્યઃ શ્રિયા ધરણ્યા શ્રિતસેવ્યપાદઃ ।
જયત્યજસ્રં જિતદૈત્યવર્ગો દેવસ્તુતશ્ચક્રધરો મુકુન્દઃ ॥ ૨૦૨॥

અકિઞ્ચનં માં પરિપાહિ વિષ્ણો નિસર્ગનિર્વ્યાજદયાસમુદ્ર ।
યત્કિઞ્ચિદસ્તીહ મદીયપુણ્યં યદીશ તદ્ વર્ધય વેઙ્કટેશ ॥ ૨૦૩॥

ત્વમુત્તમર્ણોઽપ્યધમર્ણતા મે તતોઽભવત્ સર્વમપીહ વસ્તુ ।
તવૈવ નો મે કિમહં સમર્થઃ કુર્યાં વિભો વેઙ્કટશૈલનાથ ॥ ૨૦૪॥

દાતું સમર્થોઽસિ પુમર્થજાલં પાતું પ્રભુઃ સ્વાશ્રિતજીવજાલમ્ ।
માં પાહ્યતો વેઙ્કટશૈલનાથ ત્વાં પાલકં પ્રાર્થયતે ન કો નુ ॥ ૨૦૫॥

શેષાદ્રિવાસી શરણં હરિર્નઃ કેષામસૌ યચ્છતિ કામિન્તાર્થમ્ ।
યેષાં મનસ્તસ્ય પદારવિન્દે તેષાં હિ નાન્યેષુ તનોતિ તોષમ્ ॥ ૨૦૬॥

શ્રિયઃપતિર્નઃ શ્રિયમાતનોતુ દહત્વઘં વેઙ્કટનાયકો મે ।
સ પાતુ યઃ પાલયતિ પ્રપઞ્ચં મામીશ્વરઃ પ્રેરયતુ પ્રકાશે ॥ ૨૦૭॥

શ્રીવેઙ્કટેશસ્મૃતિચિત્સુખાખ્યફલોપભોગાપ્તમહાનુભાવઃ ।

આયુષ્યમારોગ્યમુદારભાગ્યં જ્ઞાનં ચ વિષ્ણોઃ પદમતિ ધન્યઃ ॥ ૨૦૮॥

શ્રીવેઙ્કટેશસ્મરણૌષધં નઃ સમસ્તદુઃખાનિ નિરાકરોતિ ।
શ્રીવેઙ્કટાદ્રીશ્વરમન્ત્રરાજસ્ત્વસદ્ભયં શામયતિ પ્રકામમ્ ॥ ૨૦૯॥

બ્રહ્મોત્સવં શેષગિરીન્દ્રનેતુર્નિરીક્ષતે ભક્તિયુતઃ પુમાન્ યઃ ।
અંહો નિરસ્યાપ્તસમસ્તકામઃ પરં પદં વૈષ્ણવમેતિ સત્યમ્ ॥ ૨૧૦॥

શ્રીરઙ્ગશાયી પરિચિન્ત્ય સર્વે ચિરં જગદ્રક્ષણતન્ત્રતત્ત્વમ્ ।
કલૌ યુગે વેઙ્કટશૈલનાથઃ કરોતિ લેકરય ચ તેન રક્ષામ્ ॥ ૨૧૧॥

શેષાદ્રિમૌલૌ શિવલિઙ્ગમર્ચયન્ વિષ્ણુત્વમેત્યાખિલરક્ષણાય ।
શ્રીવેઙ્કટેશાત્મક આવિરાસીત્ તં દેવસેનાપતિમાશ્રયામઃ ॥ ૨૧૨॥

આગત્ય શમ્ભોરવતારમૂર્તિઃ શ્રીવેઙ્કટેશસ્ય કલાભિવૃદ્ધ્યૈ ।
યન્ત્રં ધનાકર્ષણમલિલેખ યત્રૈવ તં શેષગિરીન્દ્રમીડે ॥ ૨૧૩॥

મઙ્ગામ્બિકોદ્ગ્રાહકૃતાધમર્ણમાત્માનમીશોઽપિ સમુદ્દિધીર્ષુઃ ।
ગૃહ્ણાતિ ભક્તાર્પિતમર્થમીપ્સિતં પ્રત્યર્પયન્ યત્ર સ વેઙ્કટાચલઃ ॥ ૨૧૪॥

અભ્યર્થિતૈર્વ્યાધિનિપીડિતૈર્વા ધનાર્થિભિર્જીવનકાલિભિશ્ચ ।
ભક્ત્યર્પિતં પ્રાપ્ય કરં પ્રદિષ્ટં પ્રત્યર્પયેદ્ યત્ર હરિઃ સ વેઙ્કટઃ ॥ ૨૧૫॥

યન્મૌલિગં શ્રીપતિદિવ્યરૂપં યત્રૈવ સિદ્ધા બહવસ્તપસ્વિનઃ ।
દેવાંશજા યત્ર વસન્તિ જન્તવો જયત્યસૌ શેષગિરિર્મદીશઃ ॥ ૨૧૬॥

ઉન્મૂલયેદ્ વાઙ્મલમસ્ય કીર્તનં મૂર્તિર્મલં ચાક્ષુષમુન્મૃજેન્નઃ ।
સ્મૃતિર્મલં માનસિકં નિહન્યાચ્છ્રીવેઙ્કટાદ્રેઃ કિમિતોઽધિકં શિવમ્ ॥ ૨૧૭॥

શ્રીવેઙ્કટેશાયતનોદિતં હિ તીર્થં પિબન્તઃ શિરસા વહન્તિ ।
શ્રીપાદરેણું સતતં લભન્તે શનૈર્દિને ત્વેકુભુજઃ સુખાનિ ॥ ૨૧૮॥

કલૌ યુગે પાપિનિ નાસ્તિકાઢ્યે શ્રીવેઙ્કટેશાહ્વયમસ્તિ દૈવમ્ ।
યદાસ્તિકાનાં વરદં વરિષ્ઠં પ્રત્યક્ષમેતદ્ધિ મયાનુભૂતમ્ ॥ ૨૧૯॥

સત્યપ્રતિજ્ઞં સફલં હિ કુર્યાત્ તથાનૃતાઞ્છિક્ષયતીવ ભીતિમ્ ।
ઉત્પાદયેદ્ ભક્તિયુતં મુહુસ્તં સઞ્જીવયેદેષ દયાલુરીશઃ ॥ ૨૨૦॥

પઠન્તિ પદ્યાન્યપિ યત્ર મૂકા જાનન્તિ મૂઢાઃ કુણયો લિખન્તિ ।
પશ્યન્ત્યથાન્ધા બધિરાશ્ચ તદ્વચ્છૃણ્વન્ત્યો શેષગિરિપ્રભાવાત્ ॥ ૨૨૧॥

પઙ્ગુઃ સમારોહતિ વેઙ્કટાદ્રિં વન્ધ્યાશ્ચ હસ્તે શિશુમુદ્વહન્તિ ।
દદાતિ દીનોઽપિ મહાધનાનિ પાપી સુખં યાતિ હરેઃ પ્રસાદાત્ ॥ ૨૨૨॥

અશેષદેવાંશ વિશેષવેષં નિઃશેષિતાનન્તવિકર્મદોષમ્ ।
શેષાદ્રિભૂષાયિતદિવ્યમૂર્ત્યન્મેષં મુહુશ્ચિન્તય શેમુષીશમ્ ॥ ૨૨૩॥

શ્રીમદ્વેઙ્કટનાયક મામક્કુલદૈવતં ત્વમેવાસિ ।
કામિતદાનધુરીણઃ કલૌ યુગે ન ત્વદન્યોઽસ્તિ ॥ ૨૨૪॥

પદ્માલ્યાસહાયં મદીયચેતશ્ચકોરપૂર્ણેન્દુમ્ ।
મઙ્ગલમૂર્તિ વેઙ્કટશ‍ૃઙ્ગાલયમીશમાકયે ॥ ૨૨૫॥

રાકાશશાઙ્કવદનં રાક્ષસમથનં કૃપાસદનમ્ ।
સૌન્દર્યવિજિતમદનં સૌગુણ્યસ્યૈકતાનહમીડે ॥ ૨૨૬॥

શ્રીશેષશૈલવાસી શ્રિયઃપતિર્નઃ શ્રિયં દિશતુ ।
સ્વાશ્રિતજનચિન્તામણિરખિલાત્મૈવાશ્રયોઽસ્માકમ્ ॥ ૨૨૭॥

અથ મમ કિઞ્ચનમઘકૃતમશક્તમજ્ઞં ત્વમેવ માં વેત્સિ ।
સર્વજ્ઞ સર્વશક્તે સર્વેશ્વર, વેઙ્કટેશ પરિપાહિ ॥ ૨૨૮॥

વેઙ્કટનાથો ભગવાન્ વેદસ્તુતવૈભવો ધવોઽસ્માકમ્ ।
વિતરતુ વિજ્ઞાનિ મુહુઃ પ્રતિદિનમક્ષીણભોગભાગ્યાનિ ॥ ૨૨૯॥

આપન્નિવારકો નઃ કોઽપિ પુમાન્ વેઙ્કટાદ્રિકૃતવાસઃ ।
વિજયતિ દેવશિખામણિરોજસ્વી રક્ષકો જગતામ્ ॥ ૨૩૦॥

શેષાદ્રિશિખરધામા દોષાન્ સ્પૃષ્ટપ્રશસ્તગુણભૂમા ।
શ્રીવેઙ્કટેશનામા શ્રિયઃપતિર્મદ્ગુરુશ્ચ તન્નામા ॥ ૨૩૧॥

યોગારૂઢો ભગવાન્ ભોગીન્દ્રગિરૌ ચ તિન્ત્રિણીમૂલે ।
વલ્મીકાભિવ્યક્તો વિરાજતે વેઙ્કટેશાખ્યઃ ॥ ૨૩૨॥

અન્વહમભિષિઞ્ચન્તીં ક્ષીરં વલ્મીકમૂર્ધ્નિ ગાં વિષ્ણુઃ ।
ત્રાતું દધૌ જિઘાંસોર્ગોપસ્ય કુઠારઘાતમન્તઃ સ્થમ્ ॥ ૨૩૩॥

કુપિતસ્ય ગોજિઘાંસોઃ કુઠારઘાતં વહન્ મૂર્ધ્ના ।
તદ્વ્રણશામકમૌષધમીશઃ શેષાચલે નિષન્નસ્તિ ॥ ૨૩૪॥

સુરવરવન્દિતચરણં કરદાયિષુ સજ્જનેષુ સાદરણમ્ ।
વરવેઙ્કટગિરિશિરણં પરમં જ્યોતિઃ સદાસ્તુ મે શરણમ્ ॥ ૨૩૫॥

પુરુષાયાસ્તુ પરસ્મૈ પુરાતનાય પ્રપઞ્ચલીલાય ।
પુરુહૂતાદિભિરમરૈઃ પુરસ્કૃતાય પ્રણામોઽયમ્ ॥ ૨૩૬॥

વેઙ્કટરમણાય નમઃ સઙ્કટહરણાય સાધુશરણાય ।
રાઙ્કવસાઙ્કવધનસારાઙ્કિતવપુષે રમાવિહારજુષે ॥ ૨૩૭॥

વરિવસ્યે વેઙ્કટગિરિશરણં કરુણાલુમિન્દિરારમણમ્ ।
હરિમખિલલોકરક્ષણધુરીણમામ્નાયમસ્તકાભરણમ્ ॥ ૨૩૮॥

વૃન્દારકગણવન્દિતમિન્દીવરસુન્દરં દરસ્મેરમ્ ।
વન્દે વેઙ્કટભૂભૃન્મન્દિરમાનન્દવલ્લરીકન્દમ્ ॥ ૨૩૯॥

અતસીસુમસઙ્કાશં શતમખમુખ્યામરવ્રજાધીશમ્ ।
કૃતદુષ્ટદનુજનાશં સતતં શ્રીવેઙ્કટેશમહમીડે ॥ ૨૪૦॥

પદ્માવતીવિવાહે પદ્મધનર્ણં કુબેરતઃ કૃત્વા ।
પદ્મદ્વયધનકાઙ્ક્ષી સદ્મનિ શેષાદ્રિગે હરિર્વસતિ ॥ ૨૪૧॥

ક્રીત્વા વરાહદત્તં ક્ષેત્રં વિત્તેન શેષગિરિમૌલૌ ।
પ્રણયકુપિતેન્દિરાયાઃ પ્રસાદનાર્થી હરિઃ કલૌ વસતિ ॥ ૨૪૨॥

ભૃગુમુનિપદહતિધૂસરભગવત્તનુસઙ્ગમાક્ષિપન્તીવ ।
પ્રણયકુપિતેન્દિરાસીન્મઙ્ગામ્બા શેષભૂભૃતો નિકટે ॥ ૨૪૩॥

આકાશરાજતનયામાકાઙ્ક્ષન્ વેઙ્કટાચલે વિષ્ણુઃ ।
મૃગયામટન્નવાપ પ્રાક્ પદ્માં પ્રણયકોપતદ્રૂપામ્ ॥ ૨૪૪॥

વેઙ્કટભૂધરશિખરપ્રાઙ્ગણભુવિ તિન્ત્રિણીમૂલે ।
ભક્તાવનાય ભગવાન્ વ્યક્તાકૃતિરસ્ય વસતિં વલ્મીકે ॥ ૨૪૫॥

શમ્પાસનાભિચેલં સમ્પાદિતસર્વભક્તસાફલ્યમ્ ।
તં પાલકં ત્રિઞ્જગતાં ચમ્પસમનાસમાશ્રયે દેવમ્ ॥ ૨૪૬॥

અઞ્જનગિરિકૃતવસતિં રઞ્જકમખિલસ્ય ભક્તલોકસ્ય ।
કુઞ્જરવરદં કલયે કઞ્જદૃશં વેઙ્કટેશમિષ્ટાપ્ત્યૈ ॥ ૨૪૭॥

કા નામ દેવતાન્યા માનાવનદીક્ષિતાસ્માકમ્ ।
દીનાનાથશરણ્યં જ્ઞાનાનન્દાત્મકં હરિં ત્યક્ત્વા ॥ ૨૪૮॥

કલશાતપત્રકેતનકુલિશાઙ્કુશચક્રપદ્મરેખાભિઃ ।

વિલસત્કરાબ્જમીડે કુલદૈવં વેઙ્કટાદ્રિકૃતવાસમ્ ॥ ૨૪૯॥

વસ્ત્વસ્ત્યનન્તભૂભૃન્મસ્તકવસતિપ્રદર્શિતાકારમ્ ।
સ્વસ્ત્યયનં સાધૂનામસ્તમિતાજ્ઞાનમસ્મદારાધ્યમ્ ॥ ૨૫૦॥

વેઙ્કટમહીધ્રમૌલૌ વ્યક્તં શિવલિઙ્ગમર્ચયન્ સ્કન્દઃ ।
વિષ્ણુત્વમેત્ય તત્ફલવિશેષયોગેન વૈષ્ણવેશોઽભૂત્ ॥ ૨૫૧॥

કલિકાલેઽપિ કલાભિઃ કલિતઃ ષડ્ભિઃ કુમારસ્ય ।
કમલાપતેશ્ચ દશભિઃ કલ્યાણં વેઙ્કટેશ્વરઃ કુરુતે ॥ ૨૫૨॥

વેમિતિ કલિમલમખિલં કટતીતિ દહત્યસૌ સ્કન્દઃ ।
વેઙ્કટસુબ્રહ્મણ્યં તં વન્દે યત્ર વૈષ્ણવં ધામ ॥ ૨૫૩॥

શિવલિઙ્ગાર્ચનસુકૃતં ભવતિ હિ વિષ્ણુત્વસાધકં જન્તોઃ ।
વેઙ્કટસુબ્રહ્મણ્યો વિષ્ણુર્ભવિતૈષ વિષ્ણુકલ્પાન્તે ॥ ૨૫૪॥

નીલઘનરુચિરગાત્રં નિરુપમવિશ્વાતિશાયિચારિત્રમ્ ।
લક્ષ્મીકટાક્ષપાત્રં લક્ષ્યં ભક્તૈર્મહોઽસ્તિ સુપવિત્રમ્ ॥ ૨૫૫॥

વસ્ત્વસ્તિ શેષશૈલે વરદાભયશઙ્ખચક્રશયશોભિ ।
વિશ્વામરગણમુખ્યં વિખ્યાતં વેઙ્કટેશાખ્યમ્ ॥ ૨૫૬॥

રમતે રમયા સાકં રમણઃ સર્વપ્રપઞ્ચસ્ય ।
કમલાક્ષઃ શેષાદ્રૌ શમયન્નંહાંસિ ભક્તાનામ્ ॥ ૨૫૭॥

ૐ તત્ સદિતિ પદૈર્યત્ સતતં નિર્દિશ્યતે પરં બ્રહ્મ ।
સત્યં તચ્ચૈતન્યં નિત્યં શ્રીવેઙ્કટેશરૂપં હિ ॥ ૨૫૮॥

પ્રાણિષ્વવ્યાજકૃતં વાણીપતિપિતરમચ્યુતમનાદિમ્ ।
પૂર્ણશશિવક્ત્રમનિશં પૂર્ણગુણં શ્રીનિવાસમહમીડે ॥ ૨૫૯॥

યદ્વિષયાજ્ઞાનભવં યત્રાધ્યસ્તં જગન્મિથ્યા ।
યજ્જ્ઞાનેન તદેકં સત્યં વસ્ત્વસ્તિ વેઙ્કટેશાખ્યમ્ ॥ ૨૬૦॥

બ્રહ્મૈવેશ્વરસાઞ્જ્ઞં સ્વમાયયા વેઙ્કટેશાખ્યમ્ ।
રક્ષત્યાત્માવિદ્યાપ્રતિબિમ્બિતજીવકોટિમપિ કૃપયા ॥ ૨૬૧॥

અત્ર ખલુ પ્રત્યક્ષં શેષાદ્રૌ શ્રીનિવાસાખ્યમ્ ।
પ્રાર્થિતદાનવરિષ્ઠં સદયં ભક્તેષુ સર્વદા દૈવમ્ ॥ ૨૬૨॥

મઙ્ગલદેવી મહિષી યત્પુત્રસ્તે પિતામહો જગતઃ ।
આયુધમપિ ચ સુદર્શનમત્યધિકં વેઙ્કટેશ સામ્રાજ્યમ્ ॥ ૨૬૩॥

વિદ્યાધિદેવતા તે સ્નુષા ત્વદીયાન્ ગુણાન્ પરં સ્તૌતિ ।
વાગાત્મના ત્વમેવ સ્વાત્માનં સ્તૌષિ વેઙ્કટાદ્રીશ ॥ ૨૬૪॥

વિશ્વાસરૂપિણસ્તે વેદાસ્ત્વય્યેવ નિત્યમનુરક્તાઃ ।
સારસ્વતસર્વસ્વં ત્વદેકફલકં હિ શેષગિરિનાથ ॥ ૨૬૫॥

શેષગિરીશં સ્તોતું શેષો નાલં સહસ્રવદનોઽપિ ।
આજન્મસિદ્ધજડિમા કિમુતાહં શુકવદત્ર કિં વચ્મિ ॥ ૨૬૬॥

નાહં વદામિ વચનં વાચયિતા વેઙ્કટેશ્વરો વસતિ ।
હૃદયે સદયઃ સતતં મદાગસો નાવકાશલેશોઽપિ ॥ ૨૬૭॥

જય જય નિજચિચ્છક્તિપ્રતિબિમ્બિતવિવિધલોકવિશ્વાત્મન્ ।
શ્રીવેઙ્કટેશ ભગવચ્છ્રિતજનસંરક્ષક સ્વામિન્ ॥ ૨૬૮॥

શેષગિરીશ્વર તાવકકલ્યાણગુણાઃ કથં નુ ગણ્યાઃ સ્યુઃ ।
યદિ શેષિતાખિલાનાં જીવાનામપ્યશેષાણામ્ ॥ ૨૬૯॥

વેઙ્કટરમણો ભગવાન્ વેત્તિ મદીયાધમર્ણતાખેદમ્ ।
વિતરતિ વિત્તં કૃપયા વિષ્ણુર્વિખ્યાતભક્તજીવાતુઃ ॥ ૨૭૦॥

ભક્તેભ્યસ્ત્વમભીષ્ટં ભગવન્ યદિ ન દિશસિ ત્વમીશોઽપિ ।
તાવકનિર્વ્યાજકૃપા કાં કીર્તિં પ્રાપ્નુયાદ્ દત્ત્વા ॥ ૨૭૧॥

વિષ્ણુઃ પરમ ઇતિ શ્રુતિરૂચે યત્પરેષાં તે ।
દત્ત્વા ચ માં પરેભ્યઃ પરમોઽસિ ત્વં કથં નુ તદ્ ભગવન્ ॥ ૨૭૨॥

કારયસિ ત્વમૃણાર્ણં તસ્ય નિવૃત્તૌ ધનાનિ દાપયસિ ।
શ્રીવેઙ્કટેશ ભગવન્નાનૃણ્યં ત્વત્પ્રસાદિનો ભવિતા ॥ ૨૭૩॥

નિજતનુવનિતાત્મજગૃહધનમુખ્યં યન્મમેતિ સર્વસ્વમ્ ।
શ્રીવેઙ્કટેશ ભગવંસ્તવૈવ ચાહં દ્વિતીયોઽસ્મિ ॥ ૨૭૪॥

ત્વદ્ભક્તં મન્વાનાનામસ્માકં વિવેકવિધુરાણામ્ ।
ત્વન્નામસ્મરણવતાં માનચ્યુતિમીક્ષસે કથં વિષ્ણો ॥ ૨૭૫॥

ધનલાભસ્યાપાયં કિઞ્ચિત્ સન્દર્ભ્ય કૃચ્છ્રમઘહેતુમ્ ।
તત્રાપિ ભયમલાભં કિં મે દર્શયસિ વેઙ્કટાદ્રીશ ॥ ૨૭૬॥

ઇત્થં કરોષિ ચેદહમધમર્ણત્વં કથં નિરાકુર્યામ્ ।
ભીતોઽસ્મ્યભયં યાચે ત્વામેવ શ્રીનિવાસ તદ્ દેહિ ॥ ૨૭૭॥

વનિતાત્મજાદિનિજજનસહવાસં કાઙ્ક્ષતઃ પ્રભો યન્મે ।
આકારયિતું તાનિહ ધનદૌર્લભ્યં કરોષિ કિં શ્રીશ ॥ ૨૭૮॥

હર મે મનાંસિ કર્તું રયેન યાયાન્નરોઽદ્ય શેષાદ્રિમ્ ।
યેન શ્રીહરિદર્શનનમસ્ક્રિયાદૌ યથેચ્છલાભઃ સ્યાત્ ॥ ૨૭૯॥

શ્રીમન્નદ્ય હિ જગતાં નિવાસ શેષાદ્રિવાસ ગોવિન્દ ।
મામતિદીનં કૃપયા પાહિ પ્રતિપન્થિશમનમાકલયન્ ॥ ૨૮૦॥

શશિરવિલોચન માધવ પરમેશ્વર તે જગત્પતે યદહમ્ ।
વેઙ્કટરમણ શ્રીમન્ જય વિષ્ણો શ્રીનિવાસ ભો ભગવન્ ॥ ૨૮૧॥

પન્નગરાગિરિમસ્તકમન્દિરવાસિપ્રપન્નસૌભાગ્યમ્ ।
ચિન્મયરૂપં તેજશ્ચિત્તે નિત્યં ચિરન્તનં મેઽસ્તુ ॥ ૨૮૨॥

અન્નમયાદ્યાવરણૈઃ પઞ્ચભિરત્યાદરોપગૂઢધનમ્ ।
શ્રીવેઙ્કટેશરત્નં સ્વાત્માખ્યં પૂર્ણમસ્મ્યતોઽસ્મિ ધની ॥ ૨૮૩॥

સુખતરમખિલસુખાનાં જ્ઞાનાનામુત્તમં જ્ઞાનમ્ ।
સત્યાનામપિ સત્યં સ્વં મે વસ્ત્વસ્તિ વેઙ્કટેશાખ્યમ્ ॥ ૨૮૪॥

ઉપ્ત્વા બીજં વેઙ્કટનાથઃ સંવિત્ફલાનિ સન્તનુતે ।
શ્રીવેઙ્કટાચલપતે શ્રીમન્તં ત્વાં ભજામિ ગોવિન્દમ્ ॥ ૨૮૫॥

નિજભક્તલોકમાનસસુક્ષેત્રેઽત્યર્થસુપ્રસાદાખ્યમ્ ।
ઉપ્ત્વા બીજં વેઙ્કટનાથઃ સંવિત્ફલાનિ સન્તનુતે ॥ ૨૮૬॥

શ્રીવેઙ્કટાચલપતે શ્રીમન્તં ત્વાં ભજાનિ ગોવિન્દમ્ ।
સ્વામિન્ પ્રયચ્છ કૃપયા મહ્યમુદારાં મનોરથાવાપ્તિમ્ ॥ ૨૮૭॥

શેષગિરિનાથ તાવકચરણયુગાલમ્બિશેમુષીયોગાત્ ।
નિઃશેષિતદોષોઽહં તોષં યાસ્યામિ તે કૃપયા ॥ ૨૮૮॥

શ્રોવેઙ્કટાચલેશ્વર તાવકશક્તિઃ સમસ્તજીવેષુ ।
આનન્દચિદ્ઘનાખ્યા સ્વાનુભવે ભાતિ તામહં કલયે ॥ ૨૮૯॥

શેષગિરીશપદામ્બુજશેખરિતાત્માશ્રિતઃ સૌખ્યમ્ ।

સંવિત્સત્તારૂપં સૌવર્ગં યાતિ સર્વદા સાક્ષાત્ ॥ ૨૯૦॥

કરવાણિ વેઙ્કટેશ્વરચરણં શરણં સમસ્તજીવાનામ્ ।
દુરિતનિવારણનિપુણં દૂરીકૃતદુઃખમસ્મદાદરણમ્ ॥ ૨૯૧॥

શ્રીવેઙ્કટેશ ભગવન્ શ્રિતજનચિન્તામણે જય શ્રીમન્ ।
માં પાહિ સત્યભૂમન્ મુકુન્દ વિશ્વાત્મક સ્વામિન્ ॥ ૨૯૨॥

આવાસં કરુણાયા અધિભૂમિં સર્વસુગુણતતેઃ ।
આનન્દબોધમન્દિરમાલમ્બે વેઙ્કટાદ્રીશમ્ ॥ ૨૯૩॥

ગૌરિવ વત્સં ભગવન્ ગોવિન્દ શ્રીનિવાસ મામદ્ય ।
તાવકકરુણામૃતરસતરઙ્ગિણી વેઙ્કટેશ તર્પયતુ ॥ ૨૯૪॥

કમનઃ કમલભવાયાઃ શમનઃ સંસારઘોરતાપાનામ્ ।
દમનો દુરાત્મનામપિ સુમનઃ સેવ્યોઽસ્તિ વેઙ્કટાદ્રીશઃ ॥ ૨૯૫॥

વેઙ્કટશૈલનિવેશે વિજયતિ વિશ્વાવને શ્રીશે ।
ભક્તજનાનાં ભદ્રં નિરુપદ્રવમેવ ભવતિ નિર્નિદ્રે ॥ ૨૯૬॥

વિતરસિ વિત્તં વિષ્ણો વેઙ્કટનાથ શ્રિયઃ પતે મહ્યમ્ ।
યોગક્ષેમૌ વહસે યોગીશ્વર મે ત્વદાશ્રિતસ્ય સદા ॥ ૨૯૭॥

વિધિમિહ વિધેરપિ ત્વાં વિદ્મઃ શ્રીવેઙ્કટેશ વરદં નઃ ।
વિજ્ઞાતસર્વતત્ત્વં વિજ્ઞાનાનન્દસત્યભૂમાનમ્ ॥ ૨૯૮॥

હરિરવતુ વેઙ્કટાચલશરણઃ સર્વાર્થવર્ગનુતચરણઃ ।
અસ્માનુદારકરુણઃ કલ્યાણગુણો રમારમણઃ ॥ ૨૯૯॥

કમલાનાથ કટાક્ષાન્ કલયેઽહં કલ્પપાદપસદૃક્ષાન્ ।
દુર્જન શિક્ષણદક્ષાન્ સજ્જનસંરક્ષણૈકદીક્ષાંશ્ચ ॥ ૩૦૦॥

શ્રીવેઙ્કટાચલપતે વેઙ્કટમચલં પતિં ચ ત્વામ્ ।
શ્રીમન્તમપિ પુરાણાન્યાહુસ્ત્વં વિજયસે વિરાણમૂર્તિઃ ॥ ૩૦૧॥

મન્તુસહસ્રં કૃતવત્યન્તો મયિ પાતકસ્ય નૈવાસ્તિ ।
ક્ષન્તવ્યોઽસ્મિ ત્વાં શ્રીકાન્તં સેવે ફણાભૃદદ્રીશમ્ ॥ ૩૦૨॥

નિજચરણાશ્રિતજનતાવનનિરતાં દેવતાં ભજે કાઞ્ચિત્ ।
શ્રીવેઙ્કટેશ્વરાખ્યાં શ્રીમન્તો યત્પ્રસાદિનો મનુજાઃ ॥ ૩૦૩॥

કલિકલુષતારકં તે કલયે કલ્યાણગુણનિધે ભગવન્ ।
શ્રીવેઙ્કુટેશ્વરેતિ ચ નામામૃતતુલ્યમેવ જિહ્વાયામ્ ॥ ૩૦૪॥

કટ્વમ્લલવણરસમયકરાલનરસિંહદુઃસહાકાર ।
શ્રીવેઙ્કુટાચલપતે ક્રોધમયસ્ત્વં કથં નુ સત્સેવ્યઃ ॥ ૩૦૫॥

ક્ષુત્ક્ષામં ત્વાં સેવે ક્ષુત્ક્ષામોઽહં તતોઽભવં ખિન્નઃ ।
સર્વાધારગતાત્ તે વેઙ્કુટરમણસ્ય દુઃખિતા ન કુતઃ ॥ ૩૦૬॥

લક્ષ્મીપતિરિતિ નામાનર્થં તવ યેન ભક્તલોકસ્ય ।
દિશસિ ત્વં ભિક્ષુકતાં તદ્વિત્તં પ્રાપ્ય વેઙ્કુટાદ્રીશ ॥ ૩૦૭॥

ભક્તજનદત્તવિત્તં પ્રતિગૃહ્ય ન લજ્જસે કથં શ્રીમન્ ।
દીનેષુ તેષુ ખિદ્યત્સ્વપિ તે ન દયા ફણીન્દ્ર ગિરિરાજ ॥ ૩૦૮॥

વિત્તાશયા કરં તે દાતું સઙ્કુલ્પ્ય કઞ્ચિદથ દત્ત્વા ।
રિક્તસ્ત્વત્તસ્તદૃણં ખિદ્યતિ લબ્ધ્વા ફણાભૃદદ્રીશ ॥ ૩૦૯॥

તવ કિલ સર્વં વિત્તં ત્વદ્ભક્તસ્યાસ્તિ કિન્નુ તદ્ભિન્નમ્ ।
નિઃસ્વઃ કિં વા દદ્યાત્ કરદાનં વેઙ્કુટેશ કથયસ્વ ॥ ૩૧૦॥

સ્વત્વમથારોપ્યાત્મન્યભિમાની તત્પ્રયુક્તસઙ્કુલ્પૈઃ ।
ક્લિશ્યતિ ભક્તસ્તદ્ભ્રમનિવૃત્તયે વેઙ્કુટેશ તત્ કુરુષે ॥ ૩૧૧॥

પાલયિતુમેનમીદૃશમસમર્થશ્ચેજ્જગત્પતે દીનાન્ ।
કથમિહ સર્વાનવસિ શ્રીવેઙ્કુટશૈલનાથ કિમશક્તઃ ॥ ૩૧૨॥

ભ્રામ્યત એવ હિ જીવાન્ યોનિષ્વપિ ચતુરશીતિલક્ષાસુ ।
સર્વાંસ્ત્વમેવ પાલયસીત્યાહુર્વેઙ્કુટેશ વેદાન્તાઃ ॥ ૩૧૩॥

પાલનશક્તિસમેતસ્ત્વમિમં દીનં કથં ન પાલયસે ।
શક્તેઃ સઙ્કોચો વા ત્વં વાપ્યલસોઽસિ વેઙ્કુટાદ્રીશ ॥ ૩૧૪॥

અથવા નિર્ઘૃણતા તે લૌભ્યં દૃપ્તત્વમનભિમાનિત્વમ્ ।
દોષા એતે ત્વયિ કિં સન્તિ વદ શ્રીનિવાસ કિં બ્રૂષે ॥ ૩૧૫॥

શ્રીમદ્વેઙ્કુટગિરિવરધામાનં ચિત્સુખૈકભૂમાનમ્ ।
કામિતદાનધુરીણં કલયે કલ્યાણકલ્પતરુમીશમ્ ॥ ૩૧૬॥

વન્દે વેઙ્કુટનાયકસુન્દરચરણારવિન્દયોર્દ્વન્દ્વમ્ ।
અદ્વન્દ્વમખિલસંસૃતિનિર્દ્વન્દ્વં દ્વન્દ્વદુઃખપરિહરણમ્ ॥ ૩૧૭॥

શેષિઙ્છેષમહીભૃતિ શેષે ત્વમશેષવન્દ્યચરણોઽસિ
પેષય મદીયપાપં શોષય દુઃખાર્ણવં ચ જગદીશ ॥ ૩૧૮॥

દક્ષિણનયનં વિષ્ણોર્દૂરે તમસાં નિરસ્તદુરિતં ચ ।
આરોગ્યદાયિ કલયે વેઙ્કટરમણસ્ય વાઞ્છિતાવાપ્ત્યૈ ॥ ૩૧૯॥

દીનાનાથશરણ્યં દેવં શ્રીવેઙ્કટેશમહમીડે ।
દુરિતતિમિરૌઘમિહિરં દૂરીકૃતદુઃખમખિલશુભનિલયમ્ ॥ ૩૨૦॥

વ્યાધિયાલસુપર્ણં સુપર્ણવાહં ચ વેઙ્કટાદ્રીશમ્ ।
કલયે કમપિ રમેશં કલિકલુપહરં કૃપાપૂરમ્ ॥ ૩૨૧॥

ભુઙ્ક્તે બ્રહ્મક્ષત્રાદ્યખિલજગત્કબલમેકમિવ દેવઃ ।
ઉપદંશીકૃતમૃત્યુઃ સ ત્વં શ્રીવેઙ્કટેશ માં પાહિ ॥ ૩૨૨॥

આદિત્યાન્તર્વર્તિજ્યોતિર્મૂર્તિર્હિરણ્મયઃ પુરુષઃ
ચક્ષુઃપ્રકાશકસ્ત્વં જગતશ્ચક્ષુશ્ચ વેઙ્કટાદ્રીશ ॥ ૩૨૩॥

ત્વં દહરપુણ્ડરીકે ક્ષેત્રે ક્ષેત્રે વિભાસિ સૂક્ષ્માયાઃ ।
દીપશિખાયા મધ્યે પરમાત્મા વેઙ્કટાદ્રીશ ॥ ૩૨૪॥

શ્રોતવ્યસ્ત્વં શ્રોતા શ્રવણમપિ શ્રીપતે ત્વમેવેતિ ।
શ્રુતિરાહ વેઙ્કટાદ્રૌ શ્રૌતાર્થં ત્વાં પ્રપદ્યેઽહમ્ ॥ ૩૨૫॥

વક્તા વાગ્ વક્તવ્યો વાચયિતા વેઙ્કટેશ્વરો નાન્યઃ ।
વચસામભૂમિરસ્ય પ્રભોર્હિ મહિમા ગતિઃ સ મે દેવઃ ॥ ૩૨૬॥

ત્વામપ્રાપ્ય વચાંસિ શ્રૌતાન્યપિ યન્નિવર્તન્તે ।
સહ મનસા વેઙ્કટગિરિનાથ કથં ગોચરોઽસિ મદ્વચસામ્ ॥ ૩૨૭॥

દૃશ્યં દ્રષ્ટા દૃષ્ટિસ્ત્વમેવ યત્ સકલજગદધિષ્ઠાનમ્ ।
સત્યં ચિત્સુખરૂપં વેઙ્કટરાટ્ ત્વાં કથં નુ પશ્યામિ ॥ ૩૨૮॥

આધિવ્યાધિનિવારણમાપન્નત્રાણમાર્તિસંહરણમ્ ।
વન્દે વેઙ્કટરમણં વિશ્વામરવન્દ્યચરણમુરુકરુણમ્ ॥ ૩૨૯॥

નિજચરણભક્તરક્ષણનિપુણોઽયં વેઙ્કટાદ્રિકૃતશરણઃ ।
નિત્યાનપાયકરુણઃ કમલારમણઃ કરોતુ કલ્યાણમ્ ॥ ૩૩૦॥

વરદરચક્રાભયકરમરવિન્દાક્ષં પરાત્પરં વસ્તુ ।

કરુણૈકતાનમાશ્રિતભરણધુરીણં ભજે હરિં ભક્ત્યા ॥ ૩૩૧॥

વેઙ્કટશૈલવિહારી વેત્તિ નરાણાં મનોગતં સકલમ્ ।
દેવઃ સ એવ ભગવાન્ ભાવં સફલીકરોતુ મે કૃપયા ॥ ૩૩૨॥

સ્રષ્ટા જગતાં સ્રષ્ટુઃ પાલયિતા પાલકાનાં ચ ।
હન્તૄણામપિ હન્તા હરે ત્વમેવાસિ વેઙ્કટાદ્રીશ ॥ ૩૩૩॥

ભગવન્ વેઙ્કટનાથ ત્વદાજ્ઞયા વાતિ વાયુરાદિત્યઃ ।
અમ્બરચરો વિભાતિ ત્વત્તો મૃત્યુર્બિભેતિ ધાવતિ ચ ॥ ૩૩૪॥

વન્દે વેઙ્કટનાથં સકલબુધાશ્રેયપાદપદ્મં યમ્ ।
આરાધ્ય ભક્તિભરિતા રાજન્તે દેવમાનિતાઃ કાલે ॥ ૩૩૫॥

ત્વત્પદપઙ્કજહંસાયિતચિત્તમિમં જનં કૃપાજલધે ।
માં પાહિ સન્તતં ત્વં ભક્તાનાં ક્ષેમદાનકૃતદીક્ષ ॥ ૩૩૬॥

ૐ તત્સદિતિ યદુક્તં બ્રહ્મ શ્રીવેઙ્કટાદ્રિગં ધ્યાયે ।
તસ્માત્ સર્વોપાસ્યં સર્વજ્ઞં સર્વપૂર્ણમાત્માનમ્ ॥ ૩૩૭॥

શ્રીવેઙ્કટેશમઙ્ગલમૂર્તિધ્યાનં જનસ્ય વિમલદૃશઃ ।
સર્વં શ્રીવિષ્ણુમયં ભાતિ ચિદાનન્દરૂપમહમેવ ॥ ૩૩૮॥

યમયત્યન્તર્યામી મદન્તરઙ્ગં યથા યથાન્તઃસ્થઃ ।
કલયે તથૈવ કર્તા વેઙ્કટગિરિનાયકો નાહમ્ ॥ ૩૩૯॥

દેહદૃશા જાતોઽહં જીવદૃશા વેઙ્કટેશાંશઃ ।
આત્મદૃશૈવ તુ સોઽહં પ્રત્યગ્બ્રહ્માદ્વયાનન્દઃ ॥ ૩૪૦॥

શ્રીવેઙ્કટેશકૃપયા શ્રીમત્સ્વખિલેષુ ભક્તવર્ગેષુ ।
કશ્ચિત્ તત્ત્વં બુદ્ધ્વા સત્તામાત્રો નિરઞ્જનો ભવતિ ॥ ૩૪૧॥

અભયમમૃતં પ્રપદ્ય બ્રહ્માકારાન્તરઙ્ગવૃત્તિર્યઃ ।
નિર્દ્વન્દ્વઃ સુખસમ્પત્સત્તામાત્રો ભવેદ્ વિષ્ણુઃ ॥ ૩૪૨॥

નિત્યં શુદ્ધં બુદ્ધં શાન્તં શિવમવ્યયં ચિદાનન્દમ્ ।
પૂર્ણં બ્રહ્માહમહં બ્રહ્મ શ્રીવેઙ્કટેશપદલક્ષ્યમ્ ॥ ૩૪૩॥

ભાવાનાદ્યજ્ઞાનદ્વૈતધ્વાન્તપ્રમાપણાદિત્યાન્ ।
ભગવત્પાદકટાક્ષાન્ કલયે કલ્યાણકલ્પવૃક્ષાંશ્ચ ॥ ૩૪૪॥

જયતિ બ્રહ્માનાવૃતચિદખણ્ડરસં જગદ્ યત્ર ।
અસ્તીવ વેઙ્કટેશ્વરપદલક્ષ્યે ભાતિ લીયતે તત્ર ॥ ૩૪૫॥

વેદાન્તસારભૂતૈસ્તત્ત્વમસીત્યાદિકૈર્મહાવાક્યૈઃ ।
શ્રીમચ્છઙ્કરભગવચ્ચરણોક્તાર્થૈઃ પ્રબોધિતઃ સોઽસ્મિ ॥ ૩૪૬॥

સુબ્રહ્મણ્યમુખોદ્ધૃતસિદ્ધાન્તાર્થસ્તુતિં વિષ્ણોઃ ।
પઠતાં પાપનિવૃત્તિઃ ફલમભિલષિતં ભવેત્ સત્યમ્ ॥ ૩૪૭॥

ઇતિ સુબ્રહ્મણ્યયોગિવિરચિતા શ્રીતત્ત્વાર્થસારાવલિઃ સમાપ્તા ।

સ્તોત્રસમુચ્ચયઃ ૨ (૫૯)

The Tattvdrlliasaravali (59), in 347 verses of different metres, by Subrahmanyayogin is on Lord Venkatesvara on the hills at Tirupati. It refers to certain incidents in the story of the Venkatacalamahatmya to various tirtha-s and places of importance in Tirupati and to the tradition that the God in the shrine of Venkatesvara was originally Subrahmanya.

Proofread by Rajesh Thyagarajan

*Tattvartha Saravalih*
pdf was typeset on June 29, 2023

Please send corrections to *sanskrit@cheerful.com*